सीतासौन्दर्यपात्रं सुरमुनि विनुतं नीलमिंदीवराभं,
वंदेवंदारुफांलंरजनिचरहरं रम्य कोदण्डरामम् ।। 20

रामं चन्दनशीतलं क्षितिसुतामोहाकरंश्रीकरं,
वैदेहीनयानारविंदमिहिरं संपूर्ण चन्द्राननम् ।
राजानं करुणासमेत नयनं सीतामनः स्पन्दनं,
सीतादर्पण चारुगण्ड ल[7]लितं वंदे सदाराघवम् ।। 21

रामं श्यामाभिरामं रविशशिनयनं कोटि सूर्यप्रकाशम्,
दिव्यं दिव्यास्त्रपाणिं शरमुख शरधिं चारुकोदण्डहस्तम् ।

1. रामः सीता समेतो
2. नाम्नः समानं
3. दर्पाहरं
4. कौशल्यातनयं
5. करोदंचित ज्ञानमुद्रं
6. शुभललित मुखं
7. ललितं

कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेद दक्षं,
भीमंभीमाट्टहासं सकलभ[1]यंहरं रामचन्द्रं भजे[2]हम् ।। 22

रामचन्द्रचरितकथामृतं लक्ष्मणाग्रजगुणानुकीर्तनम् ।
राघवेश तव पादसेवनं संभवंतु मम जन्म जन्मनि ।। 23

रामो मत्कुलदैवतं सकरुणं रामं भजे सादरं,
रामेणाखिलघोरपापहितनै रामाय तस्मै नमः ।
रामा[3]नास्ति जगत्त्रयैक सुलभोरामस्यदा[4] सोस्म्यहं,
रामे प्रीतिरतीवमेकुलगुरो श्रीरामरक्षस्वमाम् ।। 24

श्रीरामचन्द्रतवकीर्तिसुरद्रुमस्य, तारागणस्सु मनसः फलमिंदुविम्बं,
मूल फणापणिगतं गगनं च मध्यं, शाखादिशोभुवनमण्डलमालवालम् ।।25

वैदेहीमुदितो[5]भिजातपुलकांगाढं समालिङ्गयन्,
वामेनस्तन चूचुकं पुलकितं वामेन करेणस्पृशन् ।
तत्वं दक्षिणपाणिनाकुलतयाचिन्मुद्रयाबोधयन्,
रामो मारुति सेवितस्मरतु मां साम्राज्य सिंहासने ।। 26

वामाङ्कस्थित जानकीपरिलसत्कोदण्ड दण्डं करे,
चक्रं चोर्ध्वकरेण वाहुयुगलेशङ्खं शरं दक्षिणे ।
विभ्राजं जलजात पत्रनयनं भद्राद्रिमूर्ध्निस्थितं,
केयूरादि विभूषितं रघुपतिं रामं भजे श्यामलम् ।। 27

वामे भूमिसुता पुरस्तु हनुमान्पश्चात्सुमित्रासुत-,
श्शत्रुघ्नो भरतश्चपार्श्वे दलयोर्वाय्वग्य कोणे[6]पि च ।
सुग्रीवश्चविभीषणश्चयुवराट् तारासुतो जाम्बवान्,
मध्ये नील सरोज कोमल रुचिं रामं भजे श्यामलम् ।। 28

---

1. सकलभमहरं
2. भजेऽहम्
3. रामान्नास्ति
4. रामस्य दासोस्म्यहम्
5. मुदितोऽभिजात
6. कोणेऽपि

राम[1]स्सीतासमेतो निवसतु हृदये सानुजं राममीले,
रामेणक्षीणपापस्त्रिविधमपिकृतंकर्मरामायदद्याम् ।
रामादन्यं न जाने नहि किमपिमहारामनाम्न[2]स्समानं,
रामे पश्यामि विश्वं भुवनमनुदिनं पाहि मां वीरराम ।। 17

रामंराजशिखामणिं रघुपतिं देवारिदर्पाहं[3],
लोकानां हितकारिणं गुणनिधिं कारुण्यपुण्योदयम् ।
मुक्ताविद्रुमरत्नशेभिततनुं सौन्दर्यं हस्ताम्बुजं,
कौ[4]सल्यातनयं भजामि सततं श्रीजानकीनायकम् ।। 18

रामं वीरासनस्थं हृदयगतकरोदं चित[5]ज्ञानमुद्रं,
जानुन्यासक्तहस्तं क्षितिवरतनया भूषितंवामभागे ।
षट्कोणे व्याहरन्तं पवनसुतयुतं मानसे मानयन्तं,
सुग्रीवेसेव्यमानेदृढ शरधनुषादक्षिणे लक्ष्मणेन ।। 19

रामं सौमित्रिमित्रं रघुपतिममलं रामचन्द्रं रमेशं,
रम्यं श्रीरघुवेशं मु[6]भललितमुखं शुद्ध सत्वं सुवीरम् ।
सीतासौन्दर्यपात्रं सुरमुनि विनुतं नीलमिंदीवराभं,
वंदेवंदारुफालंरजनिचरहरं रम्य कोदण्डरामम् ।। 20

रामं चन्दनशीतलं क्षितिसुतामोहाकरंश्रीकरं,
वैदेहीनयानारविंदमिहिरं संपूर्णं चन्द्राननम् ।
राजानं करुणासमेत नयनं सीतामनः स्पन्दनं,
सीतादर्पण चारुगण्ड ल[7]लितं वंदे सदाराघवम् ।। 21

रामं श्यामाभिरामं रविशशिनयनं कोटि सूर्यप्रकाशम्,
दिव्यं दिव्यास्त्रपाणिं शरमुख शरधिं चारुकोदण्डहस्तम् ।

---

1. रामः सीता समेतो
2. नाम्नः समानं
3. दर्पाहरं
4. कौशल्यातनयं
5. करोदंचित ज्ञानमुद्रं
6. शुभललित मुखं
7. ललितं

कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेद दक्षं,
भीमंभीमाट्टहासं सकलभ[1]यंहरं रामचन्द्रं भजे[2]हम् ।। 22

रामचन्द्रचरितकथामृतं लक्ष्मणाग्रजगुणानुकीर्तनम् ।
राघवेश तव पादसेवनं संभवंतु मम जन्म जन्मनि ।। 23

रामो मत्कुलदैवतं सकरुणं रामं भजे सादरं,
रामेणाखिलघोरपापहितनै रामाय तस्मै नमः ।
रामा[3]नास्ति जगत्रयैक सुलभोरामस्यदा[4] सोस्म्यहं,
रामे प्रीतिरतीवमेकुलगुरो श्रीरामरक्षस्वमाम् ।। 24

श्रीरामचन्द्रतवकीर्तिसुरद्रुमस्य, तारागणस्सु मनसः फलमिंदुविम्बं,
मूल फणापणिगतं गगनं च मध्यं, शाखादिशोभुवनमण्डलमालवालम् ।।25

वैदेहीमुदितो[5]भिजातपुलकांगाढं समालिङ्गयन्,
वामेनस्तन चूचुकं पुलकितं वामेन करेणस्पृशन् ।
तत्वं दक्षिणपाणिनाकुलतयाचिन्मुद्रयाबोधयन्,
रामो मारुति सेवितस्मरतु मां साम्राज्य सिहासने ।। 26

वामाङ्कस्थित जानकीपरिलसत्कोदण्ड दण्डं करे,
चक्रं चोर्ध्वकरेण बाहुयुगलेशङ्खंशरं दक्षिणे ।
विभ्राजं जलजात पत्रनयनं भद्राद्रिमूर्ध्निस्थितं,
केयूरादि विभूषितं रघुपतिं रामं भजे श्यामलम् ।। 27

वामे भूमिसुता पुरस्तु हनुमान्पश्चात्सुमित्रासुत-,
श्शत्रुघ्नो भरतश्चपार्श्वं दलयोर्वाय्वय कोणे[6]पि च ।
सुग्रीवश्चविभीषणश्चयुवराट् तारासुतो जाम्बवान्,
मध्ये नील सरोज कोमल रुचिं रामं भजे श्यामलम् ।। 28

1. सकलभमहरं
2. भजेऽहम्
3. रामान्नास्ति
4. रामस्य दासोस्म्यहम्
5. मुदितोऽभिजात
6. कोणेऽपि

वैदेही सहितं सुरद्रुमतले हैमेमहामण्डपे,
मध्ये पुष्पकमासने मणिमये वीरासनेसंस्थितम्।
अग्रेवाचमति प्रभंजनसुते तत्त्वं मुनिभ्यः परं,
व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ 29

वैदेही परिरम्यजातपुलकां लज्जावतीं सुस्मितां,
कांचि[1]नूपुर हारकंकण लसत्कर्णावतंसो ज्वलाम्।
कस्तुरी[2] घनसार चर्चित कुचां चन्द्राननां श्यामलं,
कन्दर्पाधिक सुन्दरं रघुपतिं श्रीरामचन्द्रं भजे ॥ 30

वैदेहीरमणं विभीषणविभुं विष्णुस्वरूपं हरिं,
विश्वोत्पत्तिप्रपत्ति पौ[3]षणकरं विद्याधरैरर्चितम्।
वैरिध्वंसकरं विरञ्चिजनकं विश्वात्मकं व्यापकं,
व्यासांगीरसनारदादि विनुतं वंदामहे राघवम् ॥ 31

मैथील्यानगरे विवाहसमये कल्याणवेद्यंतरे,
सामंते विमलेंदुरल[4]खचिते पीठेवसन्तौ शुभे।
शृणवन्तौ निगमार्थ वेदिविदुषामाशीर्भिराराजितौ,
पायास्तां सुवधुवरौरघुपती श्रीजानकी राघवौ ॥ 32

आसीतकमलभासा भासयन्तं त्रिलोकं,
दशरथकुलदीपं दैवतांभोजभानु।
दिनकर कुलवालं दिव्य कोदण्ड पाणिं,
कनक खचित रत्नालङ्कृतं राममीले[5] ॥ 33

सुस्निग्धं नीलकेशं स्फुटमधुरमुखं सुन्दरं भ्रूललाटं,
दीर्घाक्षं चारुनासा पुटममलमणिश्रेणिका दन्तपंक्तिम्।
विम्बोष्टं[6] कम्बुकण्ठं कठिनतर महोदरस्कमाजानुबाहुं,
मुष्टिग्राह्यावलग्नं पृथुजघनमुदारोरु जंघाङ्घ्रिमीडे ॥ 34

---

1. काञ्ची
2. कस्तूरी
3. पोषणकरं
4. रत्न
5. राममीडे
6. विम्बोष्ठं



Rama, Lakshaman, Sita, leaving Ayodhya for forest.
[राम, लक्ष्मण, सीता वन के लिए अयोध्या छोड़ते हुए]

वंदामहे महेशानचण्ड कोदण्डष[1]ण्डनम् ।
जानकी हृदयानन्द चन्दनं रघुनन्दनम् ॥ 35

जानाति राम तव नामरुचिं महेशो,
जानाति गौतमसती चरणप्रभावम् ।
जानाति दोर्बल पराक्रमे [2]शचापो,
जानात्यमोघ पटबाणगतिं पयोधिः ॥ 36

दिव्यं स्यन्दन मध्यगं रणरणच्चापान्वितं विभी[3]षणं,
कालाग्नि प्रतिमानबाण कलितं घोरास्त्रतूणी द्वयम् ।
सुग्रीवाङ्गदरावणानुजमरुत्पुत्रादि — संसेवितं,
रामं राक्षस-वीरकोटि-हरणं रक्ताम्बुजाक्षं भजे ॥ 37

ब्रह्माद्यामर सिद्धजन्मभुवनं यन्नाभि पङ्केरुहं,
श्रीनिर्वाणनिकेतनं यदुवरं लोकैकशय्यागृहम् ।
यद्वक्षः कमलाविलासभुवनं यन्नाम मंत्रसतां,
वासागारमखण्ड मण्डल निधिः पायात्स वो राघवः ॥ 38

श्रृङ्गारं क्षिति नंनं[4]दनी विहरणे वीरं धनुर्भञ्जने,
कारुण्यं वलिभञ्जने[5] द्भु तरसं सिन्धौगिरि स्थापने ।
हास्ये शूर्पनखा मुखे भयवहे वीभत्समत्या मुखे,
रौद्रं रावणमर्दने मुनिजने शान्तंवपुः पातु नः ॥ 39

माता रामो मत्पिता रामचन्द्रो,
भ्राता रामो मत्सखा राघवेशः ।
सर्वस्वम्मे रामचन्द्रो दयालुर्ना-
न्यं दैवं नैव जाने न जाने ॥ 40

---

1. खण्डनम् ।
2. तव बलपराक्रम ईश चापो ।
3 भीषणम् ।
4. नंदनी ।
5. भञ्जनेऽद्भु तरसं

मूले कल्पद्रुमस्याखिलमणिः विलसद्रत्न सिंहासनस्थं,
कोदण्डद्वन्द्व वाणैर्ललितकरयुगेनार्पितं लक्ष्मणेन ।
वामाङ्कन्यस्त सीतं[1] भरतधृतमहामौक्तिकच्छत्र कान्तिं,
शत्रुघ्नं चामराभ्यां विलसितमनिशं रामचन्द्रं भजे[2]हम् ।।41

वामे कोदण्ड दण्डं निजकरकमले दक्षिणे वाणमेकं,
पश्चाद्भोग च नित्यं दधतभि[3]मतं साचितूणीरभारम् ।
वामे वामे लसद्भ्यां सह मि[4]डित तनुं जानकीलक्ष्मणाभ्यां,
रामं श्यामं भजे[5]हं प्रणतजनमनः खेदविच्छेददक्षम् ।। 42

अम्भोधर श्यामलमम्बुजाक्षं,
धनुर्धरं वीरजटा कलापम् ।
पार्श्वद्वये लक्ष्मणमैथीलीभ्यां,
निषेद्यमाणं प्रणमामि रामम् ।। 43

कोदण्डदीक्षा गुरुमप्रमेयं,
सलक्ष्मणं दाशरथिं दयालुम् ।
आजानुबाहुं जगदेकवीरं,
अनाथनाथं रघुनाथमीडे ।। 44

कर्पूराङ्गं विलेपनं रघुवरं राजीवनेत्रं प्रभुं,
कस्तूरी निकराकृति खरधृत प्रध्वं[6]सिन श्रीहरिम् ।
कन्दर्पायुत कोटिसुन्दरतनुं कामारिसेव्यं गुरुं,
कान्ता कामदमप्रमेयममलं सीतासमेतं भजे ।। 45

---

1. सीता
2. भजेऽहम्
3. दधतभिमतं साततूणीरभारम्
4. मीडित
5. भजेऽहं
6. प्रध्वंसिनं

नीलाब्द वृंद सदृशं परिपूर्ण देहं,
दिक्पालकादि सुरसेवितपादपद्मम् ।
पीताम्वरं कनककुण्डल शोभिताङ्गं,
सीतापतिं रघुपतिं सततं भजामि ॥ 46

[1]भर्गब्रह्म सुरेन्द्र मुख्य दिविज प्राञ्चत्किरीटा-
ग्रसंसर्गनिक मणिप्रभाकर सहस्राभंपदाम्भोरुहे ।
दुर्गा संतत संस्तुतांघ्रिकमलं दुर्वार कोदण्डिनं,
गङ्गासंस्फुट मौलि मानसहरं कल्याणरामं भजे ॥ 47

अग्रेप्राञ्जलिमाञ्जनेयमनिशं वीरं च तारासुतं,
पार्श्वे पंक्तिमुखानुजं परिसरे सुग्रीवमग्रासने ।
पश्चाल्लक्ष्मणमंतिके जनकजांमध्येस्थितंराघवं,
चिन्ता तूलिकया लिखन्ति सुभयश्चित्तेषु पीताम्वरम् ॥ 48

क्षीराम्भोनिधि मध्यवर्तिनि सितेद्वीपेसुवर्णाचले,
रत्नोल्लासित कल्पभूरुहतले जाम्बूनदे मण्डपे ।
तेजो भ्राजित वेदिकेसुरुचिरे माणिक्य सिंहासने,
हेमाम्भोरुह कर्णिको[2]पस्तिले वीरासनस्थं भजे ॥ 49

दोर्दण्डैक कमण्डलीकृत महाकोदण्ड चण्डाशुगै-
र्निर्घातैरविकोटि तुल्यनिशितैर्ब्रह्मादि मुख्यस्तुतैः ।
सुग्रीवादि समस्त वानरपरानाज्ञापयन्तं गिरा,
तत्त्वं ताडयताडयेत्यनुपदं श्रीरामचन्द्रं भजे ॥ 50

1. भर्गब्रह्म सुरेन्द्र मुख्य दिविज प्राञ्चत्किरीटाग्र सत्, सर्गनिक मणिप्रभाकर सहस्राभं पदाम्भोरुहे ।
2. कर्णिकोपस्तिले

भूकम्पं जनयन्नभो विदलयन्नंभोनिधि[1] क्षोभयन्-,
दै[2]तेयांश्च विमर्दयन् गिरिवरान्भिंदनदिशः पूरयन् ।
वैदेहीमतिमोदयन् सकल गीर्वाणान् शिरः कम्पयन्,
कल्याणो रघुरामबाणविलसत्कोदण्ड चण्डध्वनिः ॥51

विमल कमलनेत्रं विस्फुरन्नीलगात्रं,
तपनकुल पवित्रं दानवध्वांत मित्रम् ।
भुवनशुभ चरित्रं भूमिपुत्रीकलत्रं,
दशरथ वरपुत्रं नौमि रामाख्या[3]मित्रम् ॥ 52

जननी जानकी साक्षाज्जनको रघुनन्दनः,
लक्ष्मणो मित्रमस्माकं कोविचारः कुतो भयम् ।
जनको रामचन्द्रो मे जननी जनकात्मजा,
हनुमत्प्रमुखास्सर्वे हरयो मम ब[4]न्धवः ॥53

जगति विशदमंत्रं जानकी प्राणमंत्रं,
विबुधविनुतमंत्रं विश्वविख्यात मंत्रम् ।
दशरथ सुतमंत्रं दैत्यसंहार मंत्रं,
रघुपति निज मंत्रं रामरामेति मंत्रम् ॥ 54

सीताया दक्षिणे पार्श्वे लक्ष्मणस्य च पार्श्वतः,
तन्मध्ये राघवं वन्दे धनुर्बाणधरं हरिम् ॥ 55

चन्द्रोपमं मलयचन्दन चर्चिताङ्गं,
मन्दारपुष्प पूजित पादपद्मम् ॥
ब्रह्मेन्द्र वंदमनिशं मुनिवृन्दसेव्यं,
वन्दे[5]रविन्दनयनं रघुराम चन्द्रम् ॥ 56

1. म्नंभोनिधिं
2. दैत्येयांश्च
3. रामाख्यमित्रम्
4. बान्धवः
5. वन्देऽरविन्दनयन



Rāmacandra attacking demon Mārica
[असुर मारीच का वध करते श्रीराम]

ब्रह्मामृतानंद फलप्रदायिनं वेदांतविज्ञान सुगन्धपुष्पितम् ।
सीताशुभा[1]ङ्गाचित बाहुशाखिनं श्रीरामकल्पद्रुममाश्रयामः ।।57

कनकनिकषभा[2]षा सीतया लिङ्गिताङ्गों,
नवकुवलय दाम श्याम वर्णोऽभिरामः ।
अभिनवयुत विद्युन्नंदितो मेघखण्डः,
शमयतु ममतापं सर्वदा रामचन्द्रः ।। 58

अलं शास्त्र[3]भ्यासैरलम सकृदाम्नाय पठनै-
रलंतीर्थस्नानैरलमखिलयागव्रत जपैः ।
अलं योगाभ्यासैरलमपिमहापातकधिया,
यदस्माकं रामस्मरणमहिमासा [4]विजयत्ते ।।59

सोरामनो मानसराजहंस संसार संताप हरक्षमालो ।
श्रीराम दैत्यांतकशान्तरूपं श्रीतारकब्रह्म नमो मम[5]स्ते ।। 60

कदा वा साकेते विमलसरयूतीर पुलिने,
समानश्रीमद्रघुपति पदाब्जे हृदिभजन ।
अये रामस्वा[6]मीन् जनकतनया वल्लभविभो,
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ।। 61

कदा वा साकेते तरुणतुलसी काननवने,
निविष्टस्थं पश्यन्नन[7]विदित विसालोर्ध्वतिलकम् ।
अये सीतानाथस्मृतिजनपतेदानवजयिन्,
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ।। 62

1. शुभाङ्गांचित
2. कनकनिकषभासा
3. शास्त्राभ्यासै
4. विजयते
5. नमस्ते
6. रामस्वामिन्
7. पश्यन्नविदित विशालोर्ध्वतिलकम,

कदा वा साकेते मणिखचित सिंहासनतले,
समासीनं रामं जनकतनयालिङ्गित तनुम् ।
अये सीताराम त्रुटितहरधन्विन् रघुपते,
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ।। 63

मार्गे मार्गे शाखिनांरत्नवेदी, वेद्यां वेद्यां किन्नरो वृन्दगीतम् ।
गीतेगीते मञ्जुलालापगोष्ठी, गोष्ठ्यांगोष्ठ्रां त्वत[1]कथा रामचन्द्र ।। 64

वृक्षे वृक्षे वीक्षिताः पक्षिसङ्घाः सङ्घे सङ्घे मञ्जुलामोदवाक्यम् ।
वाक्येवाक्ये मञ्जुलालापगोष्ठी गोष्ठ्यां गोष्ठ्यां त्व[1]त्कथा रामचन्द्र ।। 65

श्वेतपुष्पकमारूह्य सीतयासह राघवः ।
सुग्रीवादि भवद्भक्तैर्मनोम[2]ध्ये रमस्व मे ।। 66

दोर्भिः खड्गत्रिशूलडमरूमसिधनुश्चारुबाणं कुठारं,
शङ्खं चक्रं चखेटं हलमुसलगदाभिण्डिपालं च पासम् ।
विद्युद्वन्हीं च मुष्टिंत्वभयवरकरं बिभ्रतं शुभ्र वर्णं,
वन्दे रामं त्रिनेत्रां सकलरिपुकुलं मर्दयंतं प्रतापैः ।। 67

दुरिततिमिर चन्द्रो दुष्टकं जात चन्द्रे,
सुरकुवलय चन्द्रः सूर्यवंशाब्धि चन्द्रः ।
स्वजननिवह चन्द्रः शत्रुराजीव चन्द्रः,
प्रणत कुमुदचन्द्रः पातु मां रामचन्द्रः ।। 68

कल्याणदं कौशिकयज्ञपालं कलानिधिंकाञ्चन शैलधीरम् ।
कं जातनेत्रं करुणासमुद्रं काकुत्स्थरामं कलया[3]म चित्तै ।। 69

1. तत्कथा
2. मनोमध्ये
3. कलयामि

वाल्मीकि-स्मृतिमन्दरेणमथितस्सीतारमासम्भवः,
सुग्रीवाङ्गद जाम्ववादिपत्तगः सौमित्रि चन्द्रोदयः ।
वातोत्पन्न मणिर्विभीषणसुधः पौलस्त्यहालाहलो,
श्रीरामायण दुग्ध वा[1]धिरमलो भूयात्सुखश्रेयसे ।। 70

रघुनन्दन एव दैवतं नो रघुवंशोद्भव एव दैव[2]त्तंनः ।
भरताग्रज एव दैवतं नो भगवान् राघव एव दैवतं नः ।। 71

उत्फुल्लामल कोमलोत्पलदल श्यामाय रामामन-
श्चन्द्राय प्रशमाय निर्मल गुणा रामाय रामात्मने ।
ध्यानारूढ मुनीन्द्र-मानस-सरो हंसाय संसार-
विध्वंसायाद्भु ततेजसे रघुकुलोत्तंसाय पुंसे नमः ।। 72

राजीवायतलोचनं नीलोत्पल श्यामलं,
मन्दाराञ्चितमण्डपे सौवर्णके पुष्पके ।
अ[2]स्थाने नवरत्नराजखचिते सिंहासने संस्थितं,
सीतालक्ष्मण लोकपाल सहितं वंदे मुनीन्द्रास्पदम् ।।73

वल्लीप्रवालनवपल्लव पादपद्मं,
कञ्जेक्षणं जलजनील सरोरुहाभम् ।
'सीमन्तिनी नयन मोहनमूल मंत्रं,
रामं नमामि मुनि मानस राजहंसम् ।। 74

अलं विवादेन न मानु[1]षोयं[3] रामात्मनाराक्षसमर्दनाय ।
भुजङ्गस[4]य्यां परिमुच्य साक्षान्नारायणो भूतलमाजगाम ।। 75

---

1. दुग्धवारिधिरमलो
2. दैवतं नः
3. न मानुषोऽयं
4. भुजङ्गशय्यां

लोकत्राणानुकारी दशवदनशिरः पंक्तिविच्छेदकारी,
लंकालंकारहारी भृगुतनय-मनस्सर्व-गर्वापहारी ।
सीतासीमन्तकारी मणिमयमुकुटो दिव्यकोदण्डका[1]री,
श्रीराम पापहारी शमयतु दुरितं भूमि भारापहारी ।। 76

ब्रह्मादि-योगिमुनि-पूजितसिद्ध मंत्रं,
दारिद्र्यदुःख-भवरोग-विनाश मंत्रम् ।
संसार-सागर-समुत्तरणैक मंत्रं,
वंदे महाभयहरं रघुराम मंत्रम् ।। 77


शत्रुच्छेदैक मंत्रं सरसमुपनिषद्वाक्य संपूज्य मंत्रं,
संसारोत्तारमंत्रं समुचितसमये संगनिर्वाण मंत्रम् ।
सर्वैश्वर्यैकमंत्रं व्यसनभुजग संदष्ट संत्राण मंत्रं,
जिह्वा श्रीराममंत्रं जपतु जपतु मे जन्म साफल्य मंत्रम् ।। 78

आकर्णमारुढ धनुर्गुणाढ्यं ब्रह्मास्त्रमण्डीकृत राक्षसेन्द्र ।
रथाधिरूढं रणरंगधीरं रामं भजे रक्त सरोरुहाक्षम् ।। 79

एतौ तौ दशकण्ठकण्ठकदलि[2]कांतारकान्तिच्छदौ,
वैदेहीकुचकुम्भ कुंकुमलसत्यं[3] कारुणालंकृतौ,
विश्वत्राण्निदान साधुसरस प्रारम्भ यूपौ भुजौ,
ध्येयास्तामुरुविक्रमारघुपते श्रेयांसि भूयांसिनः ।। 80

वामाङ्कोपरि संस्थितावनिसुतामामुक्त भूषोज्जवलां,
पश्यंतं परिपूर्ण चन्द्रवदनं भाजत्किरीटोज्ज्वलम् ।
आसीनं नवरत्न राजिखचिते सिंहासने राघव;
सुग्रीवाङ्गद लक्ष्मणानिलसुतैरासेव्यमानं भजे ।। 81

1. कोदण्डधारी
2. कदली
3. लसत् यं



Battle between Indra and Viswâmitra Rama's Śastraguru,
[राम के शस्त्रगुरु विश्वामित्र और इन्द्र का युद्ध]

जानक्या कमलामलांजलिपुटे याः पद्मरागायुताः,
न्यस्ताराघव मस्तकेषु विलसत्कुन्दप्रसूनायुताः ।
स्रस्ता श्यामलकाय कान्तिकलिताः पादूं[1] द्वनीलायुताः,
मुक्तास्तश्शुभदाभवन्तु भवतां श्रीरामवैवाहिकाः ।। 82

नित्यं श्रीराममंत्रं निरमममधिकं नीतिसुज्ञान मंत्रं,
सत्यं श्रीराममंत्रं सदमलहृदये सर्वदा रोग्यमंत्रम् ।
स्तुत्यं श्रीराममंत्रं सुललित सुमनः सौख्य सौभाग्य मंत्रं,
पठ्यं श्रीराममंत्रं पवनजवरदं पातु मां राममंत्रम् ।। 83

व्यामोह प्रशमौषधं मुनिमनोवृत्ति प्रवृत्यौषधं,
दैत्योन्मूलकरौषधं भवभयप्रध्वंसनैकौषधम् ।
भक्तानन्दकरौषधं त्रिभुवनसञ्जीवनैकौषधं,
श्रेयः प्राप्तिकरौषधं पिबमनः श्रीरामनामौषधम् ।। 84

ध्यायेत्प्रातः सुरेशं रविकुलतिलकं रञ्जितानंतलोकं,
वालं बालारुणाक्षं भवमुखविनुतं भावगम्यं भव[3]द्यः ।
दिव्यं तं स्वर्ण क्लृप्तैमणिगण निकरैर्भूषणैरूज्ज्वलाङ्गं,
कौसल्या[4] देहजातं ममहृदयगतं राममोषत्स्मितास्यम् ।। 85

मध्याह्ने रामचन्द्रं मणिगणललितं मंद हासावलोकं,
मार्तण्डानेकभासं मरकतनिकराकारमानन्दमूर्तिम् ।
सीतावामाङ्कसस्थं सरसिजनयनं सीतवासोवसानं,
वंदेहं वासुदेवंवरसरधनुषं मानसे मे विभान्तम् ।। 86

1. या दूर्वाऽऽम नीलायिताः
2. सर्वदाऽऽरोग्य मंत्रम्
3. भवघ्नम्
4. कौशल्या देहजातं
5. वंदेऽहं
6. वरशरधनुषं

ध्यायेद् रामं सुधांशुनत सकलभवारण्य तापप्रहारं;
श्यामं शान्तं सुरेन्द्रं सुरमुनिविनुतं कोटिसूर्यप्रकाशम् ।
सीतासौमित्रि सेव्यंसुरनरसुगमं दिव्यसिंहासनस्थं,
सायाह्ने रामचन्द्रं स्मित रुचिरं[1]मुखं सर्वदा मे प्रसन्ने ॥ 87

केयूराङ्गदकङ्कणैर्मणिगणैर्वैरोचमानं सदा;
राकापर्वणि चन्द्रकोटिसदृशं छत्रेण वैराजितम् ।
हेमस्तम्भ सहस्र षोडशयुते मध्ये महामण्डपे,
देवेशं भरतादिभिः[2] परिवृतं रामंभजे श्यामलम् ॥ 88

विहाय कोदण्डमिमं मुहूर्तं गृहाणपाणौमणि चारुवेणुं ।
मा[3]यूरबर्हं च निजोत्तमाङ्गे सीतापते राघव रामचन्द्र ॥ 89

शुद्धान्ते मातृमध्ये दशरथपुरतः सञ्चरन्तः परन्तं,
काचीदामानुविद्धं प्रतिमणिविलसत्किंकिणी निक्वणाङ्गम् ।
फाले मुक्ताललामं पदयुगनिनदान्नूपुरं चारु हासं,
बाल राम[4] भजेहं प्रणतजनमनः खेद विच्छेददक्षम् ॥ 90

सम्पूर्णं चन्द्रवदनं सरसोरुहाक्षं माणिक्यकुण्डलधरं मुकुटाभिरामं,
चापेयगौरवसन शरचापहस्तं श्रीरामचन्[5]द्रंमनिशं मनसा स्मरामि ॥91॥

इन्द्रनीलमणिसन्निभदेहं वंदनीयमसकृन्मुनिवृन्दैः
लम्बमानतुलसीवनमालं चिन्तयामि सततं रघुवीरम् ॥ 92

रामचन्द्र दयासान्द्र रघुवीर नृपोत्तमं ।
लोचनाभ्यांकृपापूर पूर्णाभ्यां[6] विलोकय ॥ 93

रामेतिवर्णद्वयमादरेण सदास्मरन् मुक्तिमुपैति जन्तुः,
कलौयुगे कल्मषमानुषाणांमन्यत्र धर्मे खलु नाधिकारः ।

---

1. रुचिरमुखं सर्वदा मे प्रसन्ने
2. भरतादिभिः
3. मयूरबर्हं
4. भजेऽहं
5. श्रीरामचन्द्रमनिशं
6. मां

भक्तप्रियं भक्तसमाधिगम्यं चिन्ताहरं चिन्तित कामधेनुं
सूर्येन्दुकोटिद्युति भास्वरन्तं रामं भजे राघव रामचन्द्रम् ॥ 94

सकलभुवनरत्नं सर्वशास्त्रार्थ रत्नं;
समरविजयरत्नं सं[1]सच्चिदानंदरत्नम्,
दशमुखहररत्नं दानवारातिरत्नं;
रघुकुलनृपरत्नं पातु मां रामरत्नम् ॥ 95

मातुपार्श्वेचरन्तं मणिमयस[2]थने मञ्जुभूषाञ्चिताङ्गं,
मन्दंमन्दं पिबन्तं मुकुलितनयनं स्तन्यमन्यस्तनाग्रम् !
अङ्गुल्याग्रैः स्पृशन्तं सुखपवशया सुस्मितालिङ्गिताङ्गं,
गाढं गाढं जनन्याकलयतु हृदये मामकं रामबालम् ॥ 96

रामाभिरामं नयनाभिरामं वाचाभिरामंवदनाभिरामम् ।
सर्वाभिरामं च सदाभिरामं वंदे सदा दाशरथिं च रामम् ॥ 97

जय जय रघुराम श्रीमुखाम्भोज भानो,
जय जय रघुवीर श्रीमदाम्भोज नेत्र ।
जय जय रघुनाथ श्रीकराम्यार्चितांघ्रे,
जय जय रघवर्य श्रीशकारुण्यसिन्धो ॥ 98

जय जय वरशङ्ख श्रीगदाचक्रधारिन्,
जय जय निजदासप्राप्य दुर्लभ्य काम ।
त्रिभुवनमय सर्वप्राणिभावज्ञ विष्णो-
श्चरणमुपगतो[3] हं त्वां शरण्यम् ॥ 99

वेदः वेदो परे पुंसि जाते दशरथात्मजे,
वेदः प्राचेत[4]सा सादासीत् साक्षादरामायणात्मजा[3] ॥ 100

---

1. अत्र 'स' अधिकः
2. शयने
3. श्चरणमुपगतोऽहं
4. प्राचेतसाऽऽसीत्

श्री रामेत्येकदा वक्तुं मनो यस्य प्रवर्तते ।
वैकुण्ठ वासिनस्तस्य कुलमेकोत्तरं शतम् ।। 101


राम शब्दोच्चारमात्रेण मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशभीत्या च मकारस्तु कपाटवत् ।। 102

श्रीरामायणमादिकाव्यमृषिणा वाल्मीकिना निर्मितं,
वेदान्तार्थ विशारदैरनुदिनं स्तुत्यं सुरैरर्चितम् ।
श्रोतृणामघनाशनं सु[1]रोतरोस्तुल्यं तु मुक्तिप्रदं,
ये श्रृण्वन्ति पठन्ति रामचरितं ते यांति विष्णोः पदम् ।। 103

इति श्रीरामकर्णामृतः प्रथमः प्रकरणः ।

श्री श्री सीतारामचन्द्रार्पणम् ।
श्री श्री सीतारामचद्राभ्यां नमः ।

1. सुरतरोस्तुल्यं



Śūrpaṇkhā in Rāvan Darabār

[रावण के दरबार में शूर्पणखा]

SECOND

PRAKARAṆA



श्रीरामं जनकक्षितीश्वरसुतावक्राम्बुजा हारिणं,
श्रीमद्भानुकुलाब्धिकौस्तुभमणिं श्रीरत्नवक्षस्थलम् ।
श्रीकण्ठाद्यमरौघरत्न - मुकुटालङ्कारपादाम्बुजं,
श्रीवत्सोज्ज्वलमिन्द्रनोलसदृशं श्रीरामचन्द्रं भजे ।। 1

श्रीरङ्गेशपदाब्ज लग्नहृदयं श्रीशङ्खचक्राञ्चितं,
श्रीमन्निर्जरपादस्फुटपदं श्रीसिंहपीठस्थितम् ।
श्रीवैकुण्ठ सहस्रमस्तकलसद्भोगासने शायनं,
श्रीभूमिसुतपायुतं श्रितिनिधिं श्रीराममूर्तिं भजे ।। 2

आनन्दनन्दमरुणाधरमम्बुजाक्षं,
आपीतवस्त्रमतसीकुसुमोज्ज्वलाङ्गम् ।
अक्षान्तवर्णमकलं कममेय[1]माद्यं,
अत्याक्षतिं रघुपतिं शरणागतो[2]स्मी ।। 3

साकेतेनवरत्नपंक्तिखचिते चित्रध्वजालङ्कृते,
वामेस्वर्णमयेदलाष्ट ललिते पद्मेविमानोत्तमे ।
आसीनं भरतादिसोदरजनैः शाखामृगैः किन्नरैः,
दिक्पालैर्मुनिपुङ्गवैर्नृपगणैः संसेव्यमानं भजे ।। 4

---

1. कमनीयमादयं
2. शरणागतोऽस्मि

कन्दर्पायुत कोटिकोटि तुलितं कालाम्बुदश्यामलं,
कम्बुग्रीवमुदार कौस्तुभधरं कर्णावत्तंसोत्पलम् ।
कस्तूरीतिलकोज्ज्वल स्मितनिभं चिन्मुद्रयालङ्कृतं,
सीतालक्ष्मण वायुपुत्र सहितं सिंहासनस्थं भजे ।। 5

पराभयं दिव्यरथाङ्गशङ्खं सकौस्तुभं वेष्टित पीतवस्त्रं ।
किरीटहाराङ्गद कुण्डलाङ्गं श्रीवत्सचिन्हं शिरसा नमामि ।। 6

दिगम्बरं किङ्किणि मेखलोज्ज्वलं ललाटपर्यंत विलं वितालकं ।
कल[1]द्वचोकं कमनीय नुपु[2]रद्वय बालरामं शिरसा नमामि ।। 7

मन्दारमूलेमणिपीठ संस्थं सुधाप्लुतं दिव्य विराट्स्वरू[3]पं ।
सविन्दुना दांतरलांत तूर्यं मूर्तिं भजेहं[4] रघुवंशरत्नम् ।। 8

अनर्घ्यं माणिक्य विराजमानं श्रीपादुकालङ्कृत शोभनाभ्यां,
अशेषवृन्दारक वंदिताभ्यां नमो नमो राम पदाम्बुजाभ्याम् ।
ध्वजाम्बुजच्छत्र रथाङ्गशङ्खं दंभोलिपाशाङ्कुश मत्स्यचिन्हं,
ब्रह्मेन्द्र देवादिकिरीटकोटि संकर्षपादाम्बुज युग्ममीडे ।। 9

ललाटदेशोज्ज्वल वालभूषणं सताण्डवं व्याघ्रनखाङ्ककन्धरं ।
दिगम्बरं शोभित बर्बरालकं श्रीवालरामं शिरसा नमामि ।। 10

शताष्ट दिव्यस्थलमूर्ति वंदितं शतक्रतुब्रह्ममरुद्गणार्चितं ।
शशाङ्कवैश्वानर भानुमण्डलं स्थितं भजेहं[5] रघुवंशवर्धनम् ।। 11

कर्णान्त विश्रान्तधनुर्गुणाङ्कं कलं वलक्षीकृत राक्षसेश्वरं ।
वृद्धश्रवस्यन्दन मध्यसंस्थं रुक्षेक्षणं राममहं नमामि ।। 12

1. कलद्वचो कं
2. नूपुरद्वय
3. विराटरूपम्
4, 5. भजेऽहं

सुतरां नीलोत्पल नीलमेघश्रोनिर्जिताङ्गं सुनया धरण्याः ।
युक्त सुरेन्द्रावनमाननं त रामं भजे राक्षसवंश नाशनम् ॥ 13

राकाचन्द्र निभाननं रतिपतिद्वेषि प्रियं राक्षसा,-
धीश ग्रीवत्रिभेदन स्फुटपटु प्रख्यातबाणोज्ज्वलम् ।
रत्नालङ्कृत पादुकाञ्चित पदाम्भोजां रमावल्लभां,
रागद्वेषविहीनचित्त सुलभं रामं भजे तारकम् ॥ 14

आलोलस्फुटरत्नकुण्डलधरं आविस्मितालङ्कृतं,
आधारादिक चक्रमण्डलगतं ग्रानन्दकन्दाङ्कुरम् ।
आविर्भूत कृपातरङ्गजलधिं अक्षांतवर्णाश्रयं,
आपन्नार्तिनिदाघमेघ समयं रामं भजे तारकम् ॥ 15

साकेतांतरतार मण्डप महामाणिक्य सिंहासने,
तन्मध्येष्टदलाम्बुजेस्फुटतरेचित्कर्णिके संस्थितम् ।
सौमित्र्याम्बुजमित्रसूनुभरत श्रीवायु पुत्रैर्वृ तं,
मुद्रालङ्कृत पाणिसारसमजं रामं भजे ताकम् ॥ 16

विराजमानोज्ज्वलपीतवासं,
विशालवक्षस्थल कौस्तुभश्रियम् ।
भजेकिरीटाङ्गदरत्न - कुण्डलं,
नमस्तुलस्यामलमालयांतिकम् ॥ 17

मूलादिषट् सरसिजांत सहस्रपद्म,
पत्रान्तराल निलयं भवबन्धनाशनम् ।
नादांत चन्द्रगलितामृ सिक्तरूपं,
नादांत नाद महिमास्पद राम मीडे ॥ 18

वंदे वरपद महावरदानगर्व,लङ्काधिनाथ कुलपर्वतनाशवज्रं ।
तं रावणानुजमरुत्सुत भानुसूनु,दिक्पालसोदरगणैः परिसेव्यमानम् ॥ 19

अज्ञानगाढतिमिरा[1]पभानुमूर्ति-
मारक्तचारुनयनाम्बुजमादिबीजम् ।
अम्भोधिमध्यवटपत्र शयानमादि-
मध्यांत शून्यमखिलास्पद रामचन्द्र ।। 20

सुधासमुद्रान्तविराजमानद्वीपेसिते चन्दनपारिजाते ।
महासनेपन्नगतल्पमध्ये निषण्णमीले रघुवंशरत्नम् ।। 21

स्मिताननंपद्मदलायतेक्षणं विनीलमाणिक्यजिताङ्गशोभितम् ।
जटाकिरीटंशरचापलांछनं नमाम्यहं भानुकुलाब्धि कौस्तुभम् ।। 22

प्रसूनबाणांकितमिक्षुचापं चक्राब्जपाशाङ्कुशवंशनालं ।
धरंकरै इष्टभिरर्कवर्णं श्रीकृष्णरूपं प्रणमामि रामम् ।। 23

बाह्योरुपादोदरवक्त्रलोचनं दीप्तप्रचण्डानल दुर्निरीक्ष्यं ।
अशेष वृन्दारकनागगोचरं भजामि ते राघव विश्वरूपम् ।। 24

सहस्रनेत्रानन पादबाहुमनन्तवीर्यं रविकोटि तुल्यं ।
स्रकचन्दनालङ्कृतदिव्यदेहं भजाम्यहं ते हरिविश्वरूपम् ।। 25

कदम्बकोदण्ड गदाब्ज संयुतं दंष्ट्रा करालांकध[2]नंजयाननं ।
पीतांशुकस्वर्णकिरीटकुण्डलं भजामि ते राघवविश्वरूपम् ।। 26

कोदण्डमिक्षुजनितस्मरपिञ्छबाणं,
शङ्खं रथावयवमङ्कुशपाश वे[3]णु ।
अष्टैः करैर्णवमणिद्युतिमुद्वहन्तं,
प्रद्युम्नकृष्णमनिशं भज रामचन्द्रम् ।। 27

सीतालोकन तत्परं मणिनिधिं व्याख्यानमुद्राञ्चितं,
वामेजानुनितम्ब हस्तमनिशं वीरासनेसंस्थितम् ।
मूलेकल्प तरोरनादिमुनिभिः ब्रह्मादिभिः सेवितं,
मुक्ताहारकिरीटकुण्डलधरंमूर्ध्नाभिषिक्तं भजे ।। 28

1. तिमिरापह
2. घनं जयाननं
3. पाशवेणुं

यद्रूपमानन्दकरं मुनि[1]नां, यद्वाणमाखण्डलशत्रुनाशनं ।
यद्दैवतं सर्वजनान्तरस्थं, तत्सर्वरूपं रघुनाथ मोडे ।। 29

नादं नादविनीलचित्तपवनं नादांततत्त्वप्रियं,
नामाकारविवर्जितं नवघ[2]नंश्यामाङ्गनादप्रियम् ।
नादाम्भोजमरन्दमत्त विलसद्भृङ्गं मदांतस्थितं,
नादांतध्रुवमण्डलाब्ज रुचिरं रामं भजे तारकम् ।। 30

नानाभूतहृदब्जपद्मनिलयं नामोज्ज्वलाभूषणं,
नामस्तोत्र पवित्रितस्त्रिभुवनं नारायणाष्टाक्षरम् ।
नादांतेंदुगलत्सुधाप्लुततनुं नानात्मचिन्मात्रकं,
नानाकोटियुगान्तभानुसदृशं रामं भजे तारकम् ।। 31

खश्यामं खगवाहनं खगरिपुं खाद्यादिभूतात्मकं,
खातीतं खगमंत्र तत्परपदं खद्योतकोट्योज्ज्वलम् ।
खावाच्यं खगकेतनं खगमनं खर्वाट श्रृङ्गालयं,
खारार्यं च खरन्ध्रपीठनिलयं रामं भजे तारकम् ।। 32

वेद्यंवेदगुरुं विरञ्चिजनकं वेदान्तमूर्तिस्फुरद्-
वेदंवेदकलापमूलमहिमाधारांत कन्दाङ्कुरम् ।
वेदश्रृङ्गसमानं शेषशयनं त्रेदान्त वेदात्मिकं,
वेदाराधित पांदपकजमहं रामं भजे तारकम् ।। 33

मूलाधारधनुं जयस्फुट पटुज्ज्वालासमालिङ्गित्,
मूर्धन्यांत शशाङ्कमण्डलगतं क्षीराभिषेकप्रियम् ।
मुक्ताशोभितमौलिभिर्मुनिवरैराधितं भावये,
प्रख्यातैस्त्रिगुणैर्जनधिपगणैः शाखामृगै र्दैवतम् ।। 34

---

1. मुनीनां

ताराकारविमानमध्यनिलयं तत्वत्रपाराधितं,
तत्राधीश[1]वयोगनिर्गुणमहासिद्धैः समाराधितम् ।
तत्सङ्गं तरुणेन्द्रशेखरसखं तारा त्रयाँतर्गतं,
तप्तस्वर्णकिरीटकुण्डलयुगं रामं भजे तारकम् ।। 35

तारं तारकमण्डलोपरिलसज्ज्योतिस्फुरस्तारका-
तीतं तत्वमसीसि[2] वाक्यमहिमाधारं तडित्सन्निभम् ।
तत्वज्ञान - पवित्रित - त्रिभुवनं तारासनान्तर्गतं,
तारान्त ध्रुवमण्डलाब्जरुचिरं रामं भजे तारकम् ।। 36


कस्तूरीघनसारकुंकुमलसच्छ्रीचन्दनालङ्कृतं,
कन्दर्पाधिक सुन्दरंघननिभं काकुत्स्थवंशध्वजम् ।
कल्याणांवरवेष्टितं कमलयायुक्तंकलावल्लभं,
कल्याणाचलकार्मुकं प्रियसखं कल्याणरामं भजे ।। 37

मज्जीवं मदनुग्रहं मदधिपं मद्भावनं मत्सुखं,
मत्तातं ममसद्गुरुं ममवरं मोहान्धविच्छेदनम् ।
मत्पुण्यंमदनेकबान्धवजनं मज्जीवनं मन्निधिं,
मत्सिद्धिं ममसर्वकर्मसुकृतं रामं भजे तारकम् ।। 38

नित्यं नीरजलोचनंनिरूपमं नीवारशुकोपमं,
निर्भेदानुभवं निरन्तगुणं नीलाङ्गरागोज्ज्वलम् ।
निष्पापं निगमागमार्चितपदं नित्यात्मकं निर्मलं,
निष्पुण्यं निखिलं निरञ्जनपदंरामंभजे तारकम् ।। 39

ध्यायेत्वां हृदयाम्बुजे रघुपतिविज्ञानदीपाङ्कुरं,
हंसोहंनपरंपरादिमहिमाधारं जगन्मोहनम् ।
हस्ताम्भोजगदाब्ज चक्रमतुलं पीताम्बरंकौस्तुभं,
श्रीवत्संपुरुषोत्तमं मणिनिभं रामं भजें तारकम् ।। 40

1. तत्राधीश्वर
2. तत्वमसीति



Fight between Jāṭāyu and Ravana

[जटायु और रावण का युद्ध]



सत्यं[1] ज्ञानमनन्तमच्युतमजं अव्याकृतंतत्परं,
कूटस्थादिसमस्त साक्षिमनघं साक्षाद्विराट् तत्वदम ।
वेद्यंविश्वमयस्वलीन भुवन स्वाराख्य सौख्यप्रदं,
पूर्णपूर्णतरं पुराणपुरू[2]खं रामं भजे तारकम् ॥ 41

रामं राक्षसवंशनाशनकरं राकेन्दुविम्बाननं,
रक्षोरिरघुवंशवर्धनकरं रक्ताधरं राघवम् ।
राधायात्मनिवासिनं रविनिभंरम्यं रमानाथ कं,
रन्ध्रान्तर्गतशेषशाई[3]नमहं रामं भजे तारकम् ॥ 42

ताराकारंनिखिलनिलयं तत्वमस्यादिलक्ष्यं,
शब्दावाच्यं त्रिगुणरहित व्योममङ्गुष्ठमात्रम् ।
निर्या[4]णाख्यं सगुणमगुणं व्योमरन्ध्रान्तरासं,
सौषम्नान्तः प्रणवरहितं रामचन्द्रं भजेह[5]म् ॥ 43

मूक्ति[6]र्मूलं मुनिवरहृदानन्दकन्दं मुकुन्दं,
कूटस्थाख्यं सकलवरदं सर्वचैतन्यरूपम् ।
नादातीतं कमलनिलयं नादनादान्ततत्त्वं,
नादातीतं प्रकृतिरहितं रामचन्द्रं भजेह[7]म् ॥ 44

निजानन्दाकारं निगमतुरगाराधितपदं,
परब्रह्माख्यं परमपदयुगं पापहरणम् ।
कृपापारावारं परमपुरुषंपद्मलियं,
भजे रामं श्यामंप्रकृतिरहितं निर्गुणमहम् ॥ 45

श्रीमद्वैकुण्ठनाथं सुरमुनि मुकुटज्योतिस्वर्णपीठं,
नीलाङ्गं चन्द्रवक्त्रं मणिमयमुकुटं बाणकोदण्डहस्तम् ।
पद्माक्षंपापनाशं प्रणवमयमहारत्न सिहासनस्थ,
श्रीसीतावामभागाश्रितजनवरदं रामचन्द्रं भजेह म् ॥ 46

---

1. सत्यज्ञानमनन्तमच्युतमजमव्याकृतं
2. पुराणपुरुषं
3. शेषशायिनमहं
4. निर्वाणाख्यं
5. भजेऽहम्
6. मुक्तिर्मूलं
7. भजेऽहम्
8. भजेऽहम्

साकेतेमणिमण्डपेसुरतरू प्रान्तेविमानान्तरे,
पद्मे चाष्टदलोज्ज्वले नुतमहासौधेसुधापान्विते ।
सख्यं सूर्यजरावणानुजमरुत्पुत्रानुजैः सेवितं,
मध्येव्यासवनीलकोमलनिभं रामं भजे तारकम् ।। 47

हृदयकुहरमध्ये ज्योतितन्मंत्रसारं,
निगमथमगम्यं वेद शास्त्रैरचिन्त्यम् ।
हरिहरविधिवन्द्यं तंसमंत्रान्तरस्थं,
दशरथसुतमीडे दैवतं देवतानाम् ।। 48

देवेन्द्रनीलनवमेघ विनिर्जिताङ्गं,
पूर्णेन्दुविम्बवदनं शरचापहस्तम् ।
सीतासमेतमनिशशंरणं शरण्यः,
चेतोमदीयमभिवाञ्छित रामचन्द्रम् ।। 49

ओतप्लोतसमस्त वस्तुनिचयं ओङ्कार बीजाक्षरं,
ओङ्कारप्रकृतिषडक्षरहितं ओङ्कारकन्दाङ्कुरम् ।
ओङ्कारस्फुरभूर्भुवः सुवरिधिं ओघत्रयाराधिनं,
ओङ्कारोज्ज्वल सिंहपीठ निलयं रामं भजे तारकम् ।। 50

साकेतेधवले सुरद्रुमतले सौधे विमानान्तरे,
आदिक्षांत समस्तवर्णकमले दिव्ये मृगेन्द्रासने ।
ओङ्कारोज्ज्वल कर्णिके सुरसरिन् मध्ये सदेवान्तरे,
व्यासाद्यादि मुनिश्[1]वराद्यभिनुतं रामं भजे तारकम् ।। 51

कोदण्डदीक्षागुरुमादिमूलं,
गुणाश्रयं चन्दन कुङ्कुमाङ्कम् ।
सलक्ष्मणं सर्वजनान्तरस्थं,
परात्परं राममहं नमामि ।। 52

1. मुनीश्वराद्यभिनुतं

मूलाधार सरोरुह हुतवहस्थाने त्रिकोणान्तरे,
कंदेकुन्द विकासुषुप्तिपटलीत्रासांतवर्णाश्रये ।
बालार्क प्रतिमापराभयकरंपाशाङ्कुशालङ्कृतं,
भूतत्पाश्रयमादिपू[1]रुषमजं रामं भजे तारकम् ।। 53

स्वाधिष्ठान सरोरुहे प्रविलसद्वालांत वर्णाश्रयं,
ब्रह्मग्रन्थि महोन्नते करतले श्रीकुण्डिकामालिकाम् ।
पीठे रत्ननिभं पराभयकरं वाणीयुतं बिभ्रतं,
साक्षाद्बोधमनन्यमङ्गलकरं रामं भजे तारकम् ।। 54

डाफांत्यक्षरपङ्कजेदशदलेमाणिक्य सम्पूरिते,
विष्णुग्रन्थिमये पराभयकरं आशङ्ख चक्रान्वितम् ।
मार्ता[3]ड द्युति मञ्जुनाभमतुलं पीताम्बरं कौस्तुभं,
सर्वं सर्वंगमिन्दिरा सहचरं रामं भजे तारकम् ।। 55

हृत्पद्मे विलयार्क कोटिसदृशंकण्ठांत वर्णोज्ज्वलं,
प्राणांतप्रणवा[4]न्तरे विलसद्बोधवाण पीठान्तरे ।
सूर्योहंसमया सदाशिवपदं कोदण्डदीक्षागुरू,
वासामोक्ष रमासमेतमनिशं रामं भजे तारकम् ।। 56

साक्षात्षोडश दिव्यपत्रकमले जीवात्मसंस्थापिते,
रूद्रग्रन्थिमये मनोन्मनिपथे जालन्ध्र पीठान्तरे ।
शुभ्रज्योतिमयं शरीरसहितं संस्थंसुधाशीतलं,
शब्दब्रह्मनिवास भूतवदनं रामं भजे तारकम् ।। 57

भ्रूमध्ये निगमागमोज्ज्वलपदेचन्द्रे त्रिमार्गान्तरे,
निर्द्वन्द्वे निखिलार्थं तत्वविलसत्सूक्ष्मत्सुषम्नोन्मुखे ।
आसीनं प्रलयार्क भासुरपरं ज्योतिस्वरूपात्मकं,
कर्णानाञ्चित मोक्षलक्ष्मि सहितं रामं भजे तारकम् ।। 58

1. पुरुषमजं
2. भयकरभाशङ्ख
3. मार्तण्डद्युति
4. प्रणवान्तरेषु विलसब्दोधत्राण

शीर्षाम्भोरुह कर्णिके निरुपमे श्रीषोडशान्ते शशी-
प्रख्याख्योकृतवार्धि वीचिलहरी निर्वाण पीठान्तरे ।
शब्दब्रह्मपरं चराचरगुरुं तेजः परं शाश्वतं,
सत्यासत्यमगोचरं हृदि सदा सीता समेतं भजे ।। 59

साकेते रविकोटिसन्निभमहाहर्म्येसुसिंहासने,
नानारत्नविनिर्मिते मुनिजनाकीर्ण सदानन्दने ।
देवाधीश्वर पङ्कजे निवसितं वामाङ्कसीतोज्ज्वलं,
देवेन्द्रोपलनीलकोमलनिभं रामं भजे तारकम् ।। 60

साकेतेनगरे समस्तसुखदेहर्म्येन्दुकोटिद्युते,
नक्षत्रग्रहपंक्तिलग्नशिखरेचान्तर्य पङ्केरुहे ।
वाल्मीकात्रिपराशरादि मुनिभिः संसेव्यमानस्थितं,
सीतालङ्कृतवामभागमनिशं रामं भजे तारकम् ।। 61

वंदे राममनादिपुरुषमजं वंदे रमानायकं,
वंदे हारकिरीट कुण्डलधरं वंदेन्द्रनीलद्युतिम् ।
वंदेचाप कदम्बकोज्ज्वलकरं वंदे जगन्मङ्गलं,
वंदे पंक्तिरथात्मजं ममगुरुं वंदे सदा राघवम् ।। 62

वंदे शौनकगौतमाद्यभिनुतं वंदे घनश्यामलं,
वंदे तारकपीठमध निलयं वंदे जगन्नायकम् ।
वंदे भक्तजनौघ देवविटपं वंदे धनुर्वल्लभं,
वंदे तत्त्वमसीति वाक्य जनकं वंदे सदा राघवम् ।। 63

वंदे सूर्यशशाङ्क लोचनयुगं वंदे जगत्पावनं,
वंदे पत्र सहस्रपद्मनिलयं वंदे पुरारिप्रियम् ।
वंदे राक्षसवंशनाशनकरं वंदे सुधाशीतलं,
वंदे देवकपीन्द्र कोटिविनुतं वंदे सदा राघवम् ।। 64

1. मध्यनिलयं



Dasaratha praises Rāma

[श्री राम का गुण कथन करते नृप दशरथ]

वंदे सागरगर्वभङ्ग विशिखं वंदे जगज्जीवनं,
वंदे कौशिकयागरक्षणकरं वंदे गुरूणां गुरुम् ।
वंदे बाणशरासनोज्ज्वलकरं वंदे जटावल्कलं,
वंदे लक्ष्मण भूमिजान्वितकरं वंदे सदा राघवम् ॥ 65

वंदे पाण्डुर पुण्डरीक नयनं वंदेन्दुबिम्बाननं,
वंदे कम्बुगलंकराब्जयुगलं वंदे ललामोज्ज्वलम् ।
वंदे पीतदुकूलमम्बुदनिभं वंदे जगन्मोहनं,
वंदे कारणमानुषोज्ज्वलतनुं वंदे सदा राघवम् ॥ 66

वंदे नील सरोजकोमल रुचिं वंदे जगद्वन्दितं,
वंदे सूर्यकुलाब्धिकौस्तुभमणिं वंदे सुराराधितम् ।
वंदे पातकपञ्चकप्रहरणं वंदे जगत्कारणं,
वंदे विंशतिपञ्चतत्त्वरहितं वंदे सदा राघवम् ॥ 67

वंदे साधकवर्गकल्पकतरुं वंदे त्रिमूर्त्यात्मकं,
वंदे नादलयान्तकस्थलगतं वंदे त्रिवर्ग्यात्मकम् ।
वंदे रागविहीनचित्तसुलभं वंदे सभानायकं,
वंदे पूर्णदयामृतार्णवमहं वंदे सदा राघवम् ॥ 68

वंदे सात्त्विकतत्त्व मुद्रुत तनुं वंदे सुधानायकं,
वंदे चारु चतुर्भुजामणिनिभं वंदे षडम्बस्थितम् ।
वंदे ब्रह्मपिपीलिकादि निलयं वंदे विराड्विग्रहं,
वंदे पन्नगतल्पशा[1]ईनमहं वंदे सदा राघवम् ॥ 69

अयोध्यापुरमण्डपेस्फुरित सिंहपीठेस्थितं,
व[2]सिष्टमुनि गौतमैर्भृगुशुकादि संसेवितम् ।
दिनेश सुत रावणानुज सहोदराद्यावृतं,
भजामि रघुनन्दनं प्रणवबीज सारात्मकम् ॥ 70

---

1. शायिनमहं 2. वशिष्ठ

5

विलोलमणिमण्डल विमलचन्द्र विम्बाननं,
विखण्डित दशाननं विततचाप बाणोज्ज्वलम् ।
विमोहितजगत्रयं विकचपद्मपत्रेक्षणं,
विभीषण सुरक्षितं विजयराम मीडे हरिम् ।। 71

चलत्कनक कुण्डलोल्लसित दिव्यगण्डस्थलं,
चराचरजगन्मयं चरणपद्म गङ्गाश्रयम् ।
चतुर्विधफलप्रदं चर्मपीठ मध्यस्थितं,
चिदं शमखिलास्पदं दशरथात्मजं चिन्तये ।। 72

सनन्दनमुनिप्रियं सकलवर्ण वेदात्मक,
समस्तुनिगमागम स्फुरित तत्त्वसिंहासनम् ।
सहस्रनयनाम्बुजाद्यमरवृंद संसेवितं,
समष्टिपुरवल्लभं दशरथात्मजं चिन्तये ।। 73

अन[1]र्घ्यंमणिपूरकोल्लसित दिव्य तेजः परं,
अनाहत सरोरुहं स्फुरितहं सनादान्वितम् ।
अनन्तदलपङ्कजं स्फुटमृगाङ्क विम्बामृतं,
प्लुताङ्गमखिलास्पदं दशरथात्मजं चिन्तये ।। 74

जाग्रत्स्वप्न सुषुप्तिकाल विलसत्तत्वात्मचिन्मात्रकं,
चैतन्यात्मकमादिपापरहितं भूम्यादि तन्मात्रकम् ।
शाम्भव्यादि समस्तयोग कुलकं संख्यादि तत्त्वात्परं,
शब्दावाच्यमहं नमामि सततं व्युत्पत्ति नाशात्परम् ।। 75

ध्यायेत्वां नवविद्रुमस्फुटतनुं वर्हालसन्मेचकं,
नासारञ्जित मौक्तिकं परिलसत्पीताम्बरं कौस्तुभम् ।
वेण्याकम्बु रथाङ्ग पाशपरिघा प्राप्तेक्षु चापाशुगं,
श्रीरामं नवमन्मथादिपमहं षट्कोण चक्रस्थितम् ।। 76

1. अनर्घ्यं

साकेते नगरे समस्त महिमाधारे जगन्मोहनं,
रत्नस्तम्भ सहस्र मण्डपमहासिंहासने साम्बुजे।
विश्वामित्रव[1]सिष्टगौतमशुकव्यासादिभिर्मौनिभिः,
ध्येयं लक्ष्मण लोकपाल सहितं सीतासमेतं भजे ॥ 77

एकान्तेकमले जले विकसिते चन्द्रीकृतस्थापिते,
स्थानेतारक मंट[2]पेतनुविल व्याप्ते सुधा मण्डपे।
अब्जाकनिल मण्डलो परिमहा श्रीषोडशांते सदा,
नादान्ते जनकात्मजान्वितं[3] महं रामं भजे तारकम् ॥ 78

साकेतेमणिमण्डपे सुरतरु प्रान्तेष्ट वर्णोल्लसत्,
पत्रे तारककर्णिके प्रविलसत्कल्प प्रसूनाञ्चिते।
पद्मेवेद चतुष्क मण्डलसिते नादांत शय्यातले,
तं सेवे ध्रुवमण्डलेन्दु विगलत्पि[4]यूष धाराप्लुतम् ॥ 79

ध्यायेत्वां रविमण्डलेन्दु धवले पद्मे निषण्णंहरिं,
स्वर्णाभं करशङ्ख चक्रललितं पीताम्बरं कौस्तुभम्।
स्वर्णश्मश्रु नखालकं ललनयायुक्तं किरीटाङ्गदं,
हारालङ्कृत वक्षसंपदयुगं श्रीपादुकालङ्कृतम् ॥ 80

वसन्ताक्षराख्ये चतुः पत्र पद्मे,
त्रिकोणान्तकण्ठे धरातत्त्वयुक्ते।
पराभीति पाशाङ्कुशं विद्रुमाभं,
गजाश्वे निषण्णं भजे रामचन्द्रम् ॥ 81

वलान्तक्षराभ्यां च षट्पत्र पद्मे,
लसत्तोयतत्त्वे पराभीति हस्ते।
महाकुण्डिकां चाक्षमालानहंतं,
चतुर्वक्त्र रूपं भजे रामचन्द्रम् ॥ 82

---

1. वशिष्ठ
2. मण्डपे
3. जनकात्मजान्वितमहं
4. विगलत्पीयूष

डर्फांताक्षराख्या मणिव्रातपूरे,
रथाङ्गाब्जहस्तं महेन्द्रोपलाङ्गम् ।
लसद्वह्नि[1] तत्वं नि्रगुणं गदाङ्कं,
महाविष्णु रूपं भजे रामचन्द्रम् ।। 83

कण्ठांताक्षराख्ये जगत्प्राणतत्वे,
पराभीतिहस्तं त्रिशूलं दधानम् ।
उमानाथमब्जारि खण्डोज्ज्वलाङ्कं
दर्पाङ्गरूपं भजे रामचन्द्रम् ।। 84

विशुद्धासि पद्मे नभ[2]भोतत्व रम्ये,
अरूपं निरूपं समस्तेक्षु वासम् ।
विशिष्टं मनोगम्यमेकं[3] अनादि,
भजे जीव जीवात्म रामं च रामम् । 85

द्विपत्राब्जमध्ये मनोतत्वगम्ये,
जगत्कारणं ज्योतिरानन्द रूपम् ।
लसद्भावविष्णुं मनोभावदीपं,
परात्मस्वरूपं भजे रामचन्द्रम् ।। 86

सदानन्ददेवे सहस्रारपद्मे,
गलच्चन्द्रपि[4]यूष धारा वृ[5]त्तान्ते ।
स्थितं रा[6]मभूर्तिं निषेवे निषेवेऽ-
न्य दैवं न सेवे न सेवे न सेवे ।। 87

सुधाब्जासितद्वीपमध्ये विमाने,
सुपर्वाण वृक्षोज्ज्वले शेषतल्पे ।

1. वह्नितत्वं
2. नभोतत्व
3. मनोगम्यमेकमनादि
4. पीयूष
5. वृतान्ते 6. राममूर्तिं

निषण्णं रमां कं निषेवे निषेवेऽ-
न्य दैवं न सेवें न सेवे न सेवे ॥ 88

चिदंशंसमानं दमानंदकन्दं,
सुषम्नाख्य रन्ध्रांतरागं च हंसम् ।
सचक्रं सशङ्खं सपीताम्बराङ्कं,
परं चान्य दैवं न जाने न जाने ॥ 89

सुपर्वाण वृक्षोज्ज्वलस्वर्ण पीठे,
वनेरादिभिर्मौनिभिः सेव्यमानम् ।
स्थितं पु[1]व्यवृष्ट्यावृतं राममूर्तिं,
सदा भूमिजायुक्त मीडे हृदन्ते ॥ 90

करेदिव्य चक्रं पा[2]रेचारुशङ्खं,
गलेतारहारं ललाटे ललालम् ।
भुजङ्गे निषण्णं परानन्द रूपं,
सदा भूमिजायुक्त मीडे हृदन्ते ॥ 91

चतुर्वेद कूहोल्लसत्कारणाख्य[3]युन्—
स्फुरद्दिव्य वैमानिके भोगितल्पे ।
परं धाम मूर्तिं निषण्णं निषेवेऽ-
न्य दैवं न सेवे न सेवे न सेवे ॥ 92

लसद्दिव्य शेषाचले योगपीठें,
सदानन्द वैमानिके मासहायम् ।
मुनीनां हृदानं[4] मोङ्कारगम्यं,
सदा भूमिजायुक्त मीडे हृदन्ते ॥ 93

---

1. पुष्प
2. चक्रमपरे
3. कारणाख्युन्
4. हृदानामोङ्कारगम्यं

मवस्थं मनांतस्थमाद्यन्त रूपं,
महाचिन्तवर्जं च मध्यस्थमीशम् ।
मनोबुध्यहंकार चित्तादिसाक्षि,
परस्व प्रकाशं भजे रामचन्द्रम् ।। 94

परानन्दवस्तु स्वरूपादि साक्षि,
परब्रह्मगम्यं परं ज्योति मूर्तिम् ।
पराशक्ति मित्राप्रियाराधितांघ्रि,
परं धाम रूपं भजे रामचन्द्रम् ।। 95

परं पवित्रं परवासुदेवं परात्परं तं परमेश्वराख्यम् ।
गुणत्रयाराधित मूलकन्दमादित्यवर्णतमसः परस्तात् ।। 96

साकेते गुरुगन्धधूप निविडे माणिक्यदीपान्विते,
कस्तूरीघनसार कुङ्कमरस प्राचर्यं सरोज्ज्वले[1] ।
नानापुष्पवितान पंक्तिरुचिरे सौवर्ण सिंहासने,
वासं मन्मथ मन्मथं मणिनिभं रामं भजे तारकम् ।। 97

भङ्गोतुङ्ग मयामृताब्धि लहरीमध्ये विराड्विग्रहे,
द्वीपे निर्जर पादपैः परिवृते कर्पूर दीपोज्ज्वले ।
ओङ्कारान्तरमन्दिरे मणिमये शेषान्तरा शायिनं,
लक्ष्मीयुक्तमसारचित्सुष[2]पदं रामं भजे तारकम् ।। 98

वैकुण्ठे नगरे सुरद्रुम तले आनन्द[3] व प्रान्तरे,
नानारत्न विनिर्मितास्फुटपटु प्राकार संवेष्टिते ।
सौधेंदूपलशेष तल्पललिते नीलोत्पलच्छादिते,
पर्यङ्के शयनं रमादिसहितं रामं भजे तारकम् ।। 99

वैकुण्ठेपुटभेदनेमणिमय प्रान्तेन्दुसिंहासने,
अक्षांतांत सरोरुहे शशि गलत्पि[4]यूष वार्यन्तरे ।

1. सारोज्ज्वले 2. चित्सुख पदं
3. आयमंदंबह 4. पीयूषवार्यान्तरे

चन्द्रार्कानलभानुमण्डलयुते शेषाहि तल्पान्तरे,
वासं वासवनीलकोमलनिभं रामं भजे तारकम् ।। 100

क्षीराब्धौ शशिशङ्ख मौक्तिक लसद्वीपे सुधर्मान्तरे
विन्द्वौसार्धं कलान्विते परिलसन्नागान्तरे संस्थितम् ।
कोटीराङ्गदहारकुण्डलमणि ग्रैवेयहारोज्ज्वलं,
श्रीवत्साञ्चित इन्द्रनील सदृशं रामं भजे तारकम् ।। 101

साकेते नलचन्द्रभानु विलसच्छिच्चक्रविन्दुस्थितं,
बालार्कद्युतिभासुरङ्क तले पाशाङ्कुशा विभ्रतम् ।
बाणं चापयुतं विशालनयनं स्मेराननां[1]म्भोरुहं,
श्रीपुंरूपधरं विलाससदनं रामं भजे तारकम् ।। 102

अर्धं रक्तवदार्थं नीलरुचिरं[2] अर्धन्दु चूडार्चितं,
अर्धं रत्नकिरीटकुण्डलधरं ताटङ्कमर्धं धनु[3]म् ।
शङ्खंचक्रगदाब्ज संयुतकरं श्रेयं वैष्णवं,
पाशं चाङ्कुशवाण विधृत करं रामं भजे तारकम् ।। 103

सहस्रपत्राम्बुजकर्णिकान्त, ज्ज्योतिप्रकाशं परमादिशूलम् ।
तेजोमयं जन्मजरार्तिहीनं श्रीराघवं नित्यमहन्नमामि ।। 104

सकलभुवनरत्नं सच्चिदानन्दरत्नं सकलहृदयरत्नं सूर्यं विम्बांतरत्नं,
विमलसुकृतरत्नं वेदवेदांतरत्नं पुरहरजपरत्नं पातु मां रामरत्नम् ।
इक्ष्वाकुवंशार्णवजातरत्नं सीताङ्गनायौवन भाग्यरत्नं,
वैकुण्ठरत्नं महाभाग्यरत्नं श्रीरामरत्नं शिरसां नमामि ।। 105

निगमशिशिररत्नं निर्मलानन्दरत्नं निरुपमगुणरत्नं नादनादांतरत्नं,
दशरथकुल रत्नं द्वादशान्तस्थरत्नं पशुपतिजपरत्नं पातु मां रामरत्नम् ।

---

1. स्मेराननाम्भोरुहं
2. नीलरुचिरमर्धेन्दु
3. धनुः

शतमखनुतरत्नं षोडशांतस्थरत्नं मुनिजनजपरत्नं मुख्यवैकुंठरत्नं,
निरूपमगुणरत्नं नीरजांतस्थरत्नं परमपदविरत्नं पातु मां रामरत्नम् ।। 106

सकलसुकृतरत्नं सत्यवाक्यार्थरत्नं शमदमगुणरत्नं शाश्वतानंदरत्नं,
प्रणयनिलयरत्नं प्रस्फुरज्ज्योतिरत्नं परमपदविरत्नं पातु मां रामरत्नम् ।। 107

निखिलनिलयमंत्रं नित्य तत्त्वाख्यमंत्रं भवकुलहरमंत्रं भूमिजाप्राणमंत्रम् ।
पवनजनुतमंत्रं पार्वतीमोक्षमंत्रं पशुपति निजमंत्रं पातु मां राममंत्रम् ।।108

[1]प्रणवनिलयमंत्रं प्राणनिर्माणमंत्रं प्रकृतिपुरुषमंत्रं ब्रह्मरुद्रेन्द्रमंत्रं,
प्रकटदुरितराग द्वेषनिर्नाशमंत्रं दशरथसुतमंत्रं दैत्यसंहार मंत्रम् ।
विविधविनुतमंत्रं विश्वविख्यातमंत्रं मुनिगणनुतमंत्रं,
मुक्तमार्गैकमंत्रं रघुपति निजमंत्रं राम रामेति मंत्रम् ।। 109

संसारसागर भयापह विश्वमंत्रं साक्षान्मुमुक्ष जनसेवित सिद्धमंत्रं,
सारङ्गहस्त मुखहस्त निवास मंत्रं कैवल्यमंत्रमनिशं भज राममंत्रम् ।
जयतु जयतु मंत्रं जन्म साफल्यमंत्रं जननमरणभेदक्लेशविच्छेदमंत्रं,
सकलनिगममंत्रं सर्वशास्त्रैकमंत्रं रघुपतिनिजमंत्रं राम रामेति मंत्रम् ।।110

अज्ञानसम्भव भवाम्बुधिवडवाग्नि अव्यक्त तत्त्वनिकरप्रणवाधिरूढम् ।
सीता समेत मनुजेन हृदन्तराले प्राणप्रयाण समये मम सन्निधत्ते ।। 111

इति श्रीरामकर्णामृतः द्वितीयः प्रकरणः ।
श्रीश्रीसीतारामचन्द्रार्पणमस्तु ।
श्रीश्री सीताराम चन्द्राभ्यां नमः

●

---

1. श्लोकस्यास्यायं पाठ :—
प्रणवनिलयमंत्रं प्राणनिर्वाणमंत्रं प्रकृतिपुरुषमंत्रं ब्रह्मरुद्रेन्द्रमंत्रं,
प्रकटदुरितरागद्वेषनिर्नाशमंत्रं रघुपतिनिजमंत्रं राम रामेति मंत्रम् ।
दशरथसुतमंत्रं दैत्यसंहारमंत्रं विविधविनुतमंत्रं विश्वविख्यातमंत्रं,
मुनिगणनुतमंत्रं मुक्तमार्गैकमंत्रं रघुपति निज मंत्रं राम रामेति मंत्रम् ।।

THIRD

PRAKARAṆA



श्रीरामं शिवचापभंगनिपुणं सीताङ्गनावल्लभं,
सुत्रामार्चितपादपद्मयुगलं सूर्येन्दुनेत्रोज्ज्वलम् ।
कर्पूराङ्गवीलेपनं[1] घनरुचिं कारुण्यपाथोनिधिं,
वंदे कल्पतरुप्रवेशितलसर्त्सिहासनाधिष्ठितम् ॥ 1

श्रीरामं क्षितिकंधरस्य धनुषी संभेदना प्रापितां,
सीतां काञ्चनसन्निभां परिणतामाकल्प रत्नोज्ज्वलाम् ।
वामाङ्कोपरिलज्जया नतमुखोमालोक्य दिव्यासने,
श्रीमद्भानुशशाङ्ककोटिनिवहापायात्स वो राघवः ॥ 2

श्रीरामं भुवनैकसुन्दरतनुं धाराधरश्यामलं,
राजीवायनलोचनं[2] रघुवरं राकेन्दुविम्बाननम् ।
कोदण्डादि निजायुधाश्रित भुजैः भान्तंविदेहात्मजा-
धीशं भक्तजनादिनं रघुवरं श्रीरामचन्द्रं भजे ॥ 3

आरामं वैभवानमभिनवसुपथं हारकेयूरकान्तं,
हासोल्लासाभिरामं मणिमयमुकुटौ मङ्गलानां निवासम् ।
मन्दाराराम सीमांतरमणिभवनाधिष्ठि सेव्यं,
सल्लापानंद सिन्धु प्रणवमभिनिशं रामचन्द्रं भजेहम् ॥ 4

रामराजशिखामणिं रघुवरं राकेन्दुविम्बाननं,
राजीवायतलोचनं रणहतानेकासुरं राघवम् ।
सीताचारु पयोधराञ्चित लसत्काश्मीरगंधार्चितं,
राजत्कुण्डलमण्डितं शुभकरं रामाभिरामं भजे ॥ 5

---

1. कर्पूराङ्गविलेपनं
2. राजीवायतलोचनं

रामं कोमलनीलमेघ विलसद्गात्रं पयोजाननं,
काकुत्स्थं दशकण्ठबाहु विदलत्कोदण्डबाणान्वितम् ।
पापघ्नं विशदायताक्षियुगलं सौमित्रि संसेवितं,
भक्तानां परमौषधं मुनिवरं संस्तूयमानं भजे ।। 6

रामं श्यामलमेघ कोमलरुचिं राकेन्दुविम्बाननं,
रक्षोघ्नंरविजार्चितं रघुवरं रत्नोज्ज्वलत्कुण्डलम् ।
राजीवाक्ष समानुषं रणबलीदग्रं दमानुग्रहं,
राजेन्द्रं रमणीयरूपमसकृद्ध्याये जगन्मोहनम् ।। 7

रामं रम्यगुणं रमापतिसमंराकाशशाङ्कासनं,
राजन्यं रमणीयरूपममलं रामाभिरामं हरिम् ।
राजाराधितपादपद्ममनिशं राजन्यविद्भासितं,
राकेन्दुप्रतिमंथराकुचयुगे विन्यस्तहस्तं भजे ।। 8

रामं कौशिक गौतमप्रियकरं सीतापतिं सानुजं,
रक्षोघ्नं वनवासिनं गुणनिधिं विघ्नघ्नुमाप्तार्कजम् ।
सेतोर्बन्धन धीरवानरबलं दिक्कुम्भकर्णेन्द्रजित्,
पंक्तिग्रीवमवद्धि भीषणमजं श्रीरामचन्द्रं भजे ।। 9

रामं कोमलनील निरपेदनिभं[1] नीलालकालङ्कृतं
कट्यां श्रोभित[2] किंकिणी कण कण ध्वानैरूपेतंशिशुम् ।
कण्ठालंवितरक्षु निर्मलनखं कञ्जाक्षमब्जच्छविं,
भास्वतं [3]मकुटाङ्गदादिविविधकल्पं सदाहं[4] भजे ।। 10

रामं सीता समेतं विमल रविसता भासमानं रसार्द्रं,
श्यामं देदीप्यमानस्मित रुचिरं मुखं कुडलद्भासगण्डम् ।
श्रीवत्सं श्रीनिवासं सुरतरु विलसदरत्नसिंहासनस्थं,
दिव्याकल्पोज्ज्वलाङ्गं दिविजपतिनुतं संतत तं भजेहम्[5] ।।11

1. नीरदनिभं
2. शोभित
3. मुकुटाङ्ग
4. सदाऽहं
5. भजेहम् ।



Rāma. Lakshmaṇa pondering over the situation
[राम, लक्ष्मण स्थिति पर विचार करते हुए]

जलनिधि कृतसेतुं देवतानंदहेतुं, दशमुखमख रक्षोदानवैभव्यहेतुम् ।
मुनिजननिवहानांमुक्तिसौख्यादिहेतु[1], रघुवरकुलकेतुं कीर्तयेधर्महेतुम् ।। 12

सकलगुणनिधानं योगिभिस्तूयमानं,
भजतुसुरविमानंरक्षितेन्द्रादिमानम् ।
महितवृषभयानं सीतयाशोभिमानं,
स्मरतुहृदयभानुं ब्रह्मरामाभिरामम् ।। 13

वरगुणमणिसिन्धू मैथिलीप्राणबन्धुः,
कनकशिखरिधैर्याभूतमोह्लानुसूर्यः ।
दशरथनृपरत्नो देवतामग्रगण्यो,
भजित भुवनभद्रो पातु मां रामभद्रः ।। 14

त्रिदशकुमुदचन्द्रो दानवाम्भोजचन्द्रो,
दुरिततिमिरचन्द्रो योगिनांज्ञानचन्द्रः।
प्रणतनयनचन्द्रो मैथीली[2]नेत्रचन्द्रो,
दशमुखरिपुचन्द्रः पातु मां रामचन्द्रः ।। 15

स्वयुवतिकुवचन्द्रं बन्धुदुग्धाब्धिचन्द्रं,
सुजनकुमुदचन्द्रं वैरिवक्त्राब्ज चन्द्रम् ।
विकसितमुखचन्द्रं व्याप्तिसत्कीर्ति चन्द्रं,
सकलभुवनचन्द्रं संततं रामचन्द्रम् ।। 16

भेतालं दशकण्ठकण्ठकदलीकन्दर्पदर्पापह-
श्रीकण्ठाकृतिमाप्लुवंतिममलं घोरासुरप्राणहृ ।
वाणंप्रत्युपसंहरं तमतुलं बाणासनोद्यत्करं,
वंदे राति भयावहं मुनिनुतं रामं घनश्यामलम् ।। 17

---

1. हेतुं
2. मैथिली

आकर्णान्ति गुणोल्लसच्छरमजं कल्यांत[1] कालोपमं,
नेत्रांतारुणतामहन्तमनिशं प्रह्लाद दन्नौकिनम् ।
पौलस्त्य सुरदृष्टिचञ्चलकरं शस्त्रास्त्रसंधायिनं,
बाणानेक विचित्र हस्तकुशलं श्रीवीररामं भजे ।। 18

नह्मातान हितास्योन हिममतनयाश्चै न वसौन्दयः,
इति ममकुटिले मृत्यु रघुपति रयमेव बन्धुरासन्नः ।। 19

देवेन्द्रेणसमर्पितेध्वजयुते तत्स्पन्दनेसंस्थितं,
सोत्कण्ठात्सुवैरिवीर्यविभवं ज्ञात्वाभुजास्फालनम् ।
कृत्वासूतयुतं दशाननहरं तूणीरसंस्थं शरं,
हृत्वा ज्ञानि नदात्करोति भयदं श्रीवीर रामं भजे ।। 20

रुचिरमणिकिरीटं सुन्दरभ्रूललाटं,
कनकरुचिर चेलं काशसद्भोग खेलम् ।
विमलजलदनीलं कुण्डलो भासकर्णं,
रघुकुलजनरत्नं सन्ततं चिन्तयामि ।। 21

श्रीवत्साङ्कमुदारकौस्तुभ लसत्पीताम्बरालङ्कृतं,
नानारत्न विराजमानमुकुटं नीलाम्बुदश्याम नम् ।
कस्तूरीघनसार चर्चिततनुं मन्दारमालाधरं,
कन्दर्पायुत सुन्दरं रघुपतिं सीतासमेतं भजे ।। 22

यन्नामैवसहस्रनामसदृशं यन्नामवेदैसमं,
यन्नामाङ्कित वाक्यमासुरबलस्त्रीगर्भविच्छेदकम् ।
यन्नामंश्वपचार्य भेदरहितं मुक्तिः सदादायकं,
यन्नामं रघुराम रामरमणं श्रीरामनामामृतम् ।। 23

1: कल्पान्त

रामंराक्षसमर्दनंरघुवरं दैत्यविध्वंसिन,[1]
सुग्रीवेप्सितराज्यदं सुरपतिर्दैत्यांतकं शार्ङ्गिणम् ।
भक्तानामभयप्रदंभयहरं पापौघ विध्वंसिनं,
सामीरिस्तुतपादपद्मयुगलं सीतासमेतं भजे ॥ 24

रामं रक्तसरोरुहाक्षममलं लङ्काधिनाथान्तकं,
कौसल्या[2] नयनोत्सुकं रघुवरं नागेन्द्रतल्पस्थितम् ।
वैदेहीकुचकुम्भकुङ्कुमरजोलङ्कारिहारिं हरिं,
माया मानु[3]ष्यविग्रहं रघुपतिं सीतासमेतं भजे ॥ 25

रामं हेमतटिप्रभांशुकधरं वीरासनेसंस्थितं,
बालं नीलमणिप्रभं मधुरिपु दैतेन्द्र[4]गर्भापहम् ।
विश्वामित्रवसिष्ठ[5] वानरवरैः संसेव्यमानं सदा,
नित्यं भास्करचन्द्रकोटिसदृशं सीतासमेतं भजे ॥ 26

शत्रुघ्नो व्यजनाङ्कितोपिभरतः पार्श्वद्वयोपश्चिमे,
छत्रं चामर सयुतं कलितवान् ससेविते लक्ष्मणः ।
मूले कल्पतरोर्विमानविलसन्माणिक्यसिंहासने,
पद्मास्यं मुनिसेवितं रघुपतिं सीतासमेतं भजे ॥ 27

वामाङ्कोपरितप्त काञ्चननिभं सीतासमालोकितं,
हस्ताभ्यांधृत छत्रचामरमहासौमित्रिणा सेवितम् ।
नित्यं पूजित पादपद्मयुगलं देवैः सुरेन्द्रादिभिः,
सेव्यं मानुषराक्षसैः कपिवरैः श्रीरामचन्द्रं भजे ॥ 28

---

1. दैत्यादिविध्वंसिनं
2. कौशल्या
3. मानुष
4. दैत्येन्द्र
5. वशिष्ठ

कस्तूरीतिलकं कपीन्द्रहरणं कारुण्यवारानिधिः,
क्षीराम्बोधि सुतामुखाब्जमधुपं कल्याणरामंनिधिम् ।
कौसल्या[1] नयनोत्सुकं कविवरत्राणं महापौरुषं,
कौमारिप्रियमर्कं कोटिसदृशं सीतासमेतं भजे ।। 29

विद्युतकोटिदिवाकरद्युतिनिभं श्रीकौस्तुभालङ्कृतं,
योगीन्द्रैः सनकादिभिः परिवृतं कैलाशनाथप्रियम् ।
मुक्तारत्न किरीटकुण्डलधरं ग्रैवेयहारान्वितं,
वैदेहीकुचसन्निवासमनिशं सीतासमेतं भजे ।। 30

मेघ श्यामलमम्बुजायतनयनं विस्तीर्णवक्षस्थलं,
बाहुद्वन्दविराजित सुवदनंशोणांघ्रिपङ्केरुहम ।
नानारत्नविचित्र भूषणयुतं कोदण्डबाणाङ्कितं,
त्रैलोक्य प्रतिमानसुन्दरतनुं सीतासमेतं भजे ।। 31

विद्युतकोटिसहस्रभानुसदृशं सिंहासने संस्थितं,
मूलेकल्पतरो महामणिमये भासं परेसं विभुम् ।
सुग्रीवाङ्गद जाम्बवादि हरिभिः संसेव्यमानं हरिं;
शम्भु ब्रह्मा सुरारिभिः परिवृतं सीतासमेतं भजे ।। 32

दिव्यारण्ययतीन्द्रनामनगरे मध्ये महामण्डपे,
स्वर्णस्तम्भ सहस्रषोडशयुतेमंदारमूलाश्रिते ।
नानारत्न विचित्र निर्मल महासिंहासनेसंस्थितं,
सीतालक्ष्मण सेवितं रघुपतिं सीतासमेतं भजे ।। 33

यत्पादाम्बुजसम्भवात्त्रिपथगा भागीरथी मुक्तिदा,
लोकानांहृत किल्विषा भगवती मन्दाकिनी शाम्भवी ।
लोके भाति सरस्वती सुरनदी पूर्णेन्दु कान्ति प्रभा,
तं विष्णु[2] भरताग्रजं रघुवरं सीतासमेतं भजे ।। 34

1. कौशल्या
2. विष्णुं

यत्पादाम्बुज रेणुना मुनिसती मुक्ति गतौ यन्महा,
पुण्यं पातकनाशने त्रिजगतां भातिस्मृतापापनि ।
स्मृत्वा राघवमप्रमेयममलं पूर्णेन्दु मन्दस्मितं,
त रामं सरसीरुहाक्षममलं सीतासमेतं भजे ॥35

वैदेही कुचमण्डलाग्र विलसन् माणिक्यहस्ताम्बुजं,
काञ्चितकङ्कण हारनूपुर लसत्केयूर हारान्वितम् ।
दिव्यश्रीमणिकुण्डलोज्ज्वलमहा भूषासहस्रान्वितं,
वीर श्रीरघुवीरपुङ्गवं गुणनिधिं सीतासमेतं भजे ॥ 36

वैदेही कुचमण्डलोपरिलसन् माणिक्यहारावली,
मध्यस्थंनवनीतकोमलरुचि नीलोत्पलश्यामलम् ।
कन्दर्पायुत कोटिसुन्दरतनुं पुर्णे[1]न्दु विम्वाननं,
कौस[2]ल्याकुलभूषणं रघुपतिं सीतासमेतं भजे ॥ 37

वैदेहीयुतवामभागमतुलं वंदारुमन्दारकं,
वंदे प्रस्तुतकीर्तिवासितत रूच्छायानुकारिप्रभुम् ।
वैदेहीकुचकुङ्कुमाङ्कितमहोरस्कंमहाभूषण,
वेदान्तै रूपगीयमानमसकृत्सीतासमेतं भजे ॥ 38

वैदेहीस्तनकुम्भसंभ्रम परिरम्भावृतं सिन्धुगं,
राकाचन्द्रनिभाननं रघुवरं राजीववक्त्रेक्षणम् ।
प्रावृ[3]ण्मेघनिभद्युतिस्मितयुतं हारावलीभूषितं,
श्रीरामं प्रणमामिभवत जनता चिन्तामणिं संततम् ॥ 39

वैदेहीरमणीहिरण्यतिलकं विश्वम्भरापालकं,
वर्धिष्टमुं विविधायुधेषुनिपुणं विद्वज्जनश्रीकरम् ।
विद्यावासगृहं वियच्चरनुतं विद्युत्प्रकाशाम्वरं,
विप्रत्राणविधेयमादिपुरुषं श्रीरामचन्द्र भजे ॥ 40

1. पूर्णेन्दु
2. कौशल्या
3. प्रावृड्

वैदेहीवशवर्तिनं रणजित रत्नाकरोरोज्ज्वलं,
पङ्क्ति ग्रीवमदापहं पट्[1]भुजं पद्मापकोटिप्रभम् ।
विष्णु जिष्णुमवार्य शौर्य निलयं नीलाम्बुदश्यामलं,
रत्नालङ्करणान्वित रघुपतिं श्रीरामचन्द्रं भजे ॥ 41

देवानांहितकारिणं सभुवने कृत्वावतारं ध्रुवं,
रामं कौशिकयज्ञविघ्नदनुजघ्नंताटकी संहरम् ।
नित्यंगौतमपत्नि शापदलनं श्रीपादरेणु शुभं,
शम्भोरुत्कट चापखण्डनमहासत्त्वं भजे राघवम् ॥ 42

राजीवनेत्र रघुपुङ्गव रामभद्र राकेन्दु विम्बसदृशाननीलगात्र ।
रामाभिरामरघुवंश समुद्भवं त्वं, श्रीरामचन्द्रममदेहि करावलम्बम् ॥ 43

मुकुररुचिरगण्डं पुण्डरीकाभितुण्डं करिकरभुजदण्डं लोद्गतेजो[2]ग्निकुण्डं ।
नमितभुवनषण्डंभिन्दतोग्रारिमण्डं गुणविकरकरण्डं नौमिरामप्रचण्डम् ॥44

कोदण्डकाण्डविनिवेशितवाहुदण्डमाखण्डलाद्यमरवर्षित पुष्पवर्षं ।
आयोधनस्थितिरजः परिधूसराङ्गम व्यूतितं रघुवरेन्द्रमरिप्रभेदम् ॥ 45

शेव्यं[3] श्रीराममंत्रं श्रवणशुभकरं श्रेष्ठसुज्ञानमंत्रं,
स्तव्यं श्रीराममंत्रं नरकदुरित दुर्वारनिर्घातमंत्रम् ।
भव्यं श्रीराममंत्रंभजुतु[4]भजतु संसार निस्तारमंत्रं,
दिव्यं श्रीराममंत्रं दिवि भुवि विलसन्मोक्षरक्षैकमंत्रम् ॥ 46

आजानुबाहुमरविन्ददृशंशुभाङ्गं राजाधिराजमद्यराजितमः पतङ्गं ।
श्रीजानकीमुखसरोरुहमत्तभृङ्गं श्रीजनितं हृदि भजामिकृपांतरङ्गम् ॥47

एकानुवाणमपरेणकरेणचापं हर्षं वहन्तमसमान जटाशिरस्कं ।
सीतासहाय मनुजेन सहचरन्तं श्रीरामचन्द्रमनिशं कलयामि चित्ते ॥ 48

1. षट्भुजं
2. तेजोऽग्निकुण्डं
3. सेव्यं
4. भजतु भजतु

आमीलयंदशाशिरोवदनाम्बुजातमुन्मीलयन्जनकजानयनोत्पलानां।
आनन्दयन्सकलजीव चकोरराशिं श्रीरामचन्द्रमनिशं कलयामिचित्ते ।। 49

रामं पुराणपुरुषं रमणीयवेषं राजाधिराजमुकुटार्चितपादपीठं।
सी[1]तापतिस्तुदयनंयगदेकवीरं श्रीरामचन्द्रमनिशं कलयामि चित्ते ।। 50

सिंहासनस्थं सुरसेवितव्यं रत्नाङ्कितालङ्कृतपादपद्मं।
सीतासमेतं शशिसूर्यनेत्रं रामं भजे राघवरामचन्द्रम् ।। 51

सुग्रीवमित्रं सुजनामरुपं लङ्काहरं राक्षसवंशनाशं।
वेदाश्रयागं विपुलायताक्षं रामं भजे राघवरामचन्द्रम् ।। 52

अनन्तकीर्तिं वरदप्रसन्नं पद्मासनं सेवकपारिजातं।
राजाधिराजं रघुवीरकेतुं रामं भजे राघवरामचन्द्रम् ।। 53

पद्मासनस्थं सुरसेवितव्यं पद्मालयानंद कटाक्षवीक्ष्यं।
गन्धर्वविद्याधर गीयमानंरामं भजे राघव रामचन्द्रम् ।। 54

अचिन्त्यमव्यक्तमनन्तरूपं[2] अद्वैतमानन्दमनादिगम्यं।
पुण्यस्वरूपं पुरुषोत्तमाख्यं रामं भजे राघव रामचन्द्रम् ।। 55

मन्दस्मितं कुण्डलगण्डभागं पीताम्बरं भूषणभूषिताङ्गं।
नीलोत्पलाङ्गं भुवनैकमित्रं रामं भजे राघव रामचन्द्रम् ।। 56

डिंडीरहासमडि[2]कुण्डलचारुकर्णं दोर्दण्ड शौर्यजितखण्डनशौर्यधीर।
कोदण्डकाण्ड परिमण्डितपार्थिवेन्द्रवेदण्डयानजय राघव रामचन्द्र ।। 57

लोकान्सप्त निनादयन् हरिहयः, शुभ्रामयंभिद्यते,
सप्ताख्यां भुवनांप्रकम्पमुदयन् सप्तार्णवाघूर्णयन्।
उन्मीलानिरसातलानि जलयन् [3]सप्तादृपृथ्वीधरान्,
सुश्री राघववाहुदण्डविदलत्कोदण्ड चण्डध्वनी ।। 58

1. सीतापतिं सुनयनं जगदेकवीरं
3. मणिकुण्डल
4. सप्ताद्रि

ब्रह्माण्डं दलयन्वियद्विदलयन् भोगीशभोगस्थलं,
संत्रासं जनयन् समुद्रपटलीतोयं समुद्विलप[1]न् ।
दिक्पालानतिक्षोभयन् कुलगिरौदीर्णत्वमापादयन्,
नक्षा[2]त्रिपपातयन् विलसिते शौर्येधनुज्या रवे ।। 59

यो चण्डगाम्भीर्य धनुर्वितेजोभूमण्डलिपुरा[3]पं कृतावतारः ।
आखण्डलादैर्यमरैरू[4]पितः कोदण्डपाणि कुलदैवतं नमः ।। 60

वैदेह्यासंगम्य राज्यमनिशं सौवर्णसिंहासने,
मन्दारद्रुमवाटिकांतरमहा श्रीचन्द्रकान्तालये ।
कैकेया जनिमाञ्जनेयमनिशं सौमित्रिणा सेवितं,
मेघश्याममुदारहासवदनं श्रीरामचन्द्रं भजे ।। 61


वैदेह्यापुलकाङ्कुरार्चिततनुर्व्यलिं वहस्ताम्बुजः,
हस्तेमोदितरत्नकङ्कणरवः कल्पद्रुमाणि वने ।
पादाभ्यांमणि पादुकाद्युतिकरं प्रेखंनखाभ्यां चरं,
निष्ठालाप सुधारसादिशतु मे श्रीरामचन्द्रं भजे ।। 62

वामाङ्कस्थित जानकीकुचयुगे विस्रस्तहस्ताम्बुजं,
उज्जृम्भाननपङ्कजं पारलसद्विस्पष्ट विम्वाधनम् ।
सप्तारेणविशिष्टःकङ्कणरवे ओङ्कार शब्दाश्रये,
भान्तं शारदचन्द्रहासमनिशं वदे सदा राघवम् ।। 63

वैदेहीसहितं सलक्ष्मणयुतं कैकासुतं सानुगं,
सुग्रीवश्चविभीषणानिलसुतं नीलंनलं साङ्गदम् ।
विश्वामित्रवसि[5]ष्ट गौतमभरद्वाजानुसंसेवितं,
रामोमारुति सेवितं स्मरतुमा[6]सां म्राज्यसिंहासने ।। 64

1. विलपयन्
2. नक्षत्राणि
3 भूमण्डलेवपुरापं
4. निरूपित
5. वशिष्ठ
6. तां साम्राज्यसिंहासने





रामः प्राञ्जलिदग्रतो[1] निलसुतः सौभ्रातृमादर्शयन्,
छत्रं चामर युग्म भासितकरान् पश्चास्थले पार्श्वयोः।
वामाङ्के च निजान् विभीषणमुखान् सम्भावयन्वोधयन्,
धीमुद्राकरतत्त्वरूपमवतान् साम्राज्य सिंहासने ॥ 65

पौगण्डेहितवालकः परिवृतः पूर्णेन्दुकान्ताननः,
प्रीत्यावद्धविचित्रहेमवसने संसक्त काञ्ची गुणः।
आजानुप्रविलम्बवाहुयुगलश्यामाम्बुभृड्विग्रहं,
भातृ त्द्यानुचरश्चराचरगुरूः पायात्सदा राघवः ॥ 66

वैदेहीरमणीय वक्त्र वनजप्रद्योत खद्योतनं,
केलीसद्मनि रत्नदीपकलिका कान्तेवसन्तं हरिम्।
सौरभ्यः प्रसवप्रयुक्तविल[2]च्छायान्तरे शायिनं,
श्रीमंतं रघुवंश दीपकमणिं श्रीरामचन्द्रं भजे ॥ 67

रामोबद्ध पयोनिधिर्गुणनिधिर्गत्वागचारैरवं,
लङ्काप्राप्यसकुम्भकर्णं दनुजं हत्वा रणे रावणम्।
तत्रा[3]स्थाप्य विभीषणं पुनरगाच्छीतापतिः पुष्पकं,
चानूढः पुनरागतः सभृतवान् धात्रीमजः पातु नः ॥ 68

रत्नोल्लसज्ज्वलित कुण्डलगण्डभागं,
कस्तूरिकातिलक शोभितफाल भागम्।
कर्णान्तिदीर्घनयनं करुणाकटाक्षं,
श्रीरामचन्द्र मुखमात्मनि सन्निधत्ताम् ॥ 69

हेलाभग्नशशाङ्क शेखरधनुर्भूमण्डलाखण्डल,
श्रेणीमौलि लसद्वि[4]न्तनमणिभिर्दीप्तांघ्रि पङ्केरुहः।
[5]कल्याणां जनत्थखण्डविभवः कल्याणलीलोत्सवे,
मार्तण्डान्वय मण्डनश्च भवतांरामिः सरामः सदा ॥ 70

---

1. ग्रतोऽनिलसुतः
2. विलसच्छायान्तरे
3. तत्रस्थाप्य
4. लसद्विरत्न
5. कल्याणं जनयत्यखण्डविभवः

विद्युस्फुरन् मकरकुण्डलदीप्तचारुगण्डस्थलंमणिकिरीटविराजमानं।
पीताम्वरं जलदनीलमुदारकांतिं श्रीरामचन्द्रमनिशं कलयामि चित्ते ।। 71

करतलधृत चापं कालमेघस्वरूपंसरसिजदलनेत्रं चारुहासं सुगात्रं ।
विचिनुतवनवासं विक्रमोदग्रवेषंप्रणमित रघुनाथंजानकीप्राणनाथम् ।। 72

यः पृथ्वीभरवारणायदिविजैः संप्रार्थितश्चिन्मयः,
संजातः पृथ्वीतले, रविकुले मायामनुष्ये[1]ष्ययः ।
निश्चक्रं हतराक्षस पुनरगाद् ब्रह्मत्वमाद्यस्थिरा,
कीर्तिपापहरां विधायजगतां तं जानकीसं[2] भजे ।। 73

विश्वो[3]द्भुतस्थितिलयादिषु हेतुमेकं,
मायाश्रयं विगतमायमचिन्त्य मूर्तिम् ।
आनन्दसान्द्रममलं निजबोध रूपं,
सीतापतिं विदिततत्त्वमहं नमामि ।। 74

श्रीरामं नवरत्न कुण्डलधरं श्रीरामरक्षामणिं,
श्रीरामं च सहस्रभानु सदृशं श्रीरामचन्द्रोदयम् ।
श्रीरामद्भुतकीर्तिनाकरमहं श्रीराममुक्तिप्रदं,
श्रीरामं रघुनन्दनं भयहरं श्रीरामचन्द्रं भजे ।। 75

रामः पातु नरैवमामरिभयाद्रामं सदा भावये,
रामेणैवहृदंमहत्तरः नमो रामाय नित्यं नमः ।
रामान्नास्तिपरं पदंसुललिता[4] रामस्य पादौ भजे,
रामे प्रीतिरचञ्चला [5]स्तुमम हे श्रीराम मां पालय ।। 76

राममिन्दीवरश्यामं राजीवायत लोचनं ।
ज्याघोष निर्जितारातिं जानकीरमणं भजे ।। 77

1. मनुष्यैष यः
2. जानकीशं
3. विश्वोऽद्भुत्
4. पदं सुललितं
5. चञ्चलाऽऽस्ति

हत्वायुद्धे दशास्यस्त्रिभुवनविषमं वामहस्तेन चापं,
भूमावष्टभ्यतिष्ठं निरतकरनूतं भ्रूमयं वाणमेकम् ।
आरक्तोपांतनेत्रो शरदलितवपुः कोटि सूर्य प्रकाशं,
वीर श्रीबंधुरागास्त्रिदशपतिनुतः पातु मां वीर रामः ॥ 78

युद्धेसन्नद्धशस्त्रंकपिवरभयदं कुम्भकर्णं सुरारिं,
बाणैनेकेनसद्यः प्रकटितहृदभृग्वो'श्वरोषारुणाक्षम् ।
हत्वाकृत्वा प्रमोदं सुरकपिविततेर्मौनिवृंदैकसेव्यं,
वीरश्रीबंधुरागास्त्रिदशपतिनुतः पातु मां वीर रामः ॥ 79

दयतेमोदग्रसेव्यंपटुतरविशिखं भीषणं घोरनादं,
देवेन्द्रस्तूयमानस्फुरवरनिकरानंदकादीन् हत्वा ।
दिक्पालान् प्राप्यभोगान्मणिरुचिशुभगादि क्षुतांतापयुत् या—
वीरश्री बंधुरागास्त्रिदशपति नुतः पातु मां वीर रामः ॥ 80

कौस[1]ल्यावीरगर्भांबुधि घनविलसत्पूर्णचन्द्रः प्रतापः,
मौनोन्द्रस्वांत पद्मप्रविमलतरुणी धर्मनैपुण्यरूढा ।
मारीचं राक्षे[2]सन्दं निजशरदहनानाहुती कल्पयित्वा,
वीरश्रीबंधु रागास्त्रिदशपति नुतः पातु मां वीर रामः ॥ 81

यो दण्डकारण्य निशाचरेन्द्रा[3] कोदण्डलीलाविषयाञ्चकार !
वेदण्डशुण्डायतबाहुदण्ड कोदण्डपाणिः कुलदैवतं नः ॥ 82

तरुणौरुपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चिरकृष्णाजिनांवरौ ॥ 83

फलमूलाशनौ दन्तौ तापसौ धर्मचारिणौ ।
रक्षः कुलनिहन्तारौ भ्रातरौ रामलक्ष्मणौ ॥ 84

---

1. कौशल्या
2. राक्षसेन्द्रं
3. निशाचरेन्द्रान्

कल्याणानांनिदानं कलिमलदहनंपावनंपावनानां,
पाथेयं पारमोक्षास्पदवरमनिशं प्राप्तये प्रस्थितस्य ।
विश्वमास्थानमेकं कविबरवचनं जीवितानां[1],
बीजं धर्मद्रुमस्यप्रभं[2] भवति भवतां पूतये रामनाम ।। 85

कौ[3]सल्यानयनेन्दु दशरथमुखारविंद—
मार्तण्डां सीतामानसहंसरामं राजीवलोचनम् ।
दीर्घबाहुमरविंदलोचनं दीनवत्सलमनाथ रक्षण,
दीक्षिनं सकललोक रक्षितं दैवतं दशरथात्मजं भजे ।। 86

सत्येनलोकान्जयति दीनां दानेन राघवः,
गुरुं शुश्रूषया वीरो धनुषा युद्ध शास्त्रवान् ।
मर्दनं भवबीजानामार्जनं सुख सम्पदां,
तर्जनं यमदूतानां रामरामेति भर्जनम् ।। 87

सकृतप्रणतरक्षाय साक्षि यस्य विभीषणः,
सत्पराधा[1]त्प्रतीकाशः सः श्रीरामोगतिर्मम ।
न जाने जानकी जाने राम त्वन्नाम वैभवं,
सर्वदि भगवान्शम्भुः वाल्मीकिर्वेति वा न वा ।। 88

कृत्याकृत्यविवेकहीनमनसां हत्वादिभिर्जीविना—
मत्यन्तं बहुतारकं तनुभृतमत्यन्त रम्भादिना ।
सत्यानन्दमयं समस्त निगमस्तुल्यास्पदं संपदां,
स्थानं श्रीरघुरामनाममलं नित्यं स्मरमुच्यते ।। 89

साकेतस्वनिकेतने सुरतरोर्मूलेलसद्वेदिके,
हैमेरत्नमयं तथानमपरं हस्ताम्बुजं जानुनी ।
सीतापार्श्वगतां सरोवरकरांविद्युन्निभाराघवं,
पश्यन्तं परिपूर्णचन्द्रवदनं भासत्किरीटं भजे ।। 90

1. जीव्यं
2. प्रभवतु
3. कौशल्या

विद्युतवर्णोपमाङ्गी विकच दलमुखो विद्रुमाभाधरो[1]ष्टीं,
वदण्डौतध्यकुम्भंप्रतिकुच[2]सुगलं वेदिमध्यावतंसाम्।
श्यामासं पुल्ल[3]पद्मांसदनिभनयनां चारुहासं सुनासां,
सीतां श्रीरामदेवीं श्रितजनवरदां चिन्तयेनंतमूर्त्यम्॥ 91

माणिक्यमञ्जीरपदारविन्दां रामार्कवतफुल्लमुखारविन्दां।
भक्तप्रदातृत्वकरारविन्दां देविं भजे राघववल्लभां ताम्॥ 92

जयतु जयतु कारी जानकीमोदधारी,
तपनकुलविहारी दण्डकारी[4]ण्यचारी।
दशवदनकुठारी दैत्यविच्छेदकारी,
मणिमुकुटदधारी चन्दकोदण्डधारी॥ 93

चेतस्थितं चिन्तनीयं चिंरोहर[5] चिन्तितपारिजात।
अचिन्तनोयं वहुचिन्तयेऽहं त्वमेव रामं भुवनाभिरामम्॥ 94

साकेते शदिन्दु[6] कुन्दधवले सौधेमहामण्डप,
पर्यस्थागरुधूपधूमपटले कर्पूरदीपोज्ज्वले।
सुग्रीवाङ्गद वायुपुत्र सहितं सौमित्रिणा सेवितं,
लीलामानुषविग्रहं रघुपतिं रामं भजे श्यामलम्॥ 95

रामः पिता राघव एव माता रामैव बन्धुश्चसखा सखी वा।
रामो गुरुर्मे परमं च दैवं रामं विना नान्यमहं स्मरामि॥ 96

या कृपा मुनिसंत्राणे या कृपा कपि नायके।
या विभीषणरक्षायां सा राम मम दीयताम्॥ 97

---

1. भाधरोष्ठी
2. युगलां
3. फुल्लपद्मां
4. दण्डकारण्यचारी
5. चिन्ताहरं
6. शरदिन्दु

दयानिधे राघवरामचन्द्र निरस्व पापानि ममावलानि ।
त्वयैव भक्ति सदृढां प्रयच्छ सैव प्रसूताह्यखिलानभिष्टान् ।। 98

आक्षीणबाण तूणीर समारूढित कार्मुकः ।
दशग्रीव शिरोहंता श्रीरामच्छरणं मम ।। 99

श्रीराम मे त्वंहि पिता च माता श्रीराम मे त्वं हि सुहृच्च बन्धुः ।
श्रीराम मे त्वं हि गुरुश्चगो[1]ष्ट श्रीराम मे त्वं हि समस्तमेव ।। 100

पटुतरजलवाहध्वानमादायचापं,
पवनजवनवेगं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे,
रणहरदनुजेन्द्रो रामचन्द्रः सहायः ।। 101

कौस[2]ल्यालसदालवालजनितः सीतालतालिङ्गितः,
सिक्ति पंक्तिरथने सौदरमहा साखाभिरत्युन्नतः ।
रक्षस्तीक्ष्ण निदाघपाटनपटुच्छायाभिरानंद कृद्—
थन्मद्वांछित सत्फलानि भवतु श्रीरामकल्पद्रुमः ।। 102

निगमशिशिर रत्नं नित्यमाशास्यरत्नंजननुतनृपरत्नं जानकीरूपरत्नं ।
भुवनवलयरत्नं भूभुजामेकरत्नं रघुकुल वररत्नं पातु मां रामरत्नं ।। 103

विशालनेत्र परिपूर्णगात्रं सीताकलि[3]वसुरवैरिजैत्रं ।
कारुण्यपात्रं जगतः पवित्रं श्रीरामरत्नं प्रणतो[4]स्मिनित्यम् ।। 104

श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याण गुणाभिरामः ।
सीतामुखाम्भोरुह चच्चरीको निरन्तरं मङ्गलमातनोतु ।। 105

1. श्रेष्ठं
2. कौशल्या
3 कलत्रं
4. प्रणतोऽस्मि

इन्दीवरदलश्यामपुण्डरीक निभेक्षणां ।
धृतकोदण्ड तूणीरो राम एव गतिर्मम ।। 106

इच्छामों हि महाबाहु रघुवीरं महाबले ।
गजेन्द्र महतायां तं राम छत्रा वृताननम् ।। 107

रामो नाम बभूव हुंतदबला सीतेतिहुंतौपितु—
र्वाचा पञ्चवटी वने विहरतस्तामाहरद्रावणः ।
निद्रार्थं जननीकथामिति रवे हुंकारतः श्रृण्वता,
सौमित्रे [1]क्वधनुर्धमरिति व्यग्रा गिरः पातु नः ।। 108

श्रीरामचन्द्रेति दयावरेति भक्तप्रियेति भवबंधन मोंचनेति ।
नाथेति नागशयनेति सदारतुवन्तं मां पाहि भीतमनिशं कृपणं कृतघ्नम् ।।109

रामचन्द्रचरितामृत पानं सोमपान शतकोटि समानं ।
सोमपान शत कोटिभिरेव जन्मनेति रघुनायक नाम्ना ।। 110

राम राम दयासिन्धो रावणाथ जगतत्पते ।
त्वत्पाद कमलासक्ति र्भवेज्जन्मजि[2] जन्मनि ।। 111

श्रीराघवं रामचन्द्रं रावणारिं रमापतिं ।
राजीवलोचनंरामं तं वंदे रघुनायकम् ।। 112

यत्पादपङ्कजरजः श्रुतिभिर्विमग्न,
यन्नभिपङ्कजभवः कमलासनस्यात् ।
यन्नामसाररसिको भगवान् पुरारिः,
तं रामचन्द्रमनिशं हृदि भावयामि ।। 113

1. क्वधनुर्ध्वनिरिति
2. र्भवेज्जन्मनि

यस्यावतार चरितानि विरञ्चि लोके—
गायन्ति नारदमुखाभवपद्मजाद्याः ।
आनन्दजाश्रु परिषिक्त कुचाग्र सीमा,
वागीश्वरी च तमहं शरणं प्रपद्ये ।। 114

जातिभ्रष्टो[1]पिपापी परधनपरदारेषु नित्योद्यतो,
वास्तेयी[2] ब्रह्मघ्न माता[3]पितृ वध निरतो योगिवृंदापकारी ।
ध्येयं कर्णामृतं यः पठति हि सततं रामचन्द्रस्य भक्तः,
योगीन्द्रै रप्यलक्ष्यं पदमपि लभते सर्वं देवैश्च सेव्यम् ।। 115

इति श्रीरामकर्णामृतः
तृतीयः प्रकरणः समाप्तः ।

PRAKARANA THIRD

1. भ्रष्टोऽपि
2. वा स्तेयी
3. मातृपितृ

Rāma's talk to kaikeyr



Departure from harem
[रनिवास से विदाई]



FOURTH

PRAKARANA

श्रीरामं जनकात्मजा कुचतटी श्रीगन्धपङ्कोल्लसद्—
वक्षोवीथिमुदारमाश्रितमुनि प्रादुर्भवत् कल्पकम् ।
ब्रह्मेशान मुखामरस्तुतमजं ब्रह्माण्डभाण्डाधिपं,
वंदे कौसलकन्यकासुतमह्व वाराशिगर्वापहम् ।। 1

साकेतेमणि निर्मिते प्रविलसत्सौधयुतानां शते,
अन्तर्गेहमतीत भानुनिलये चञ्चत्पताकोज्ज्वले ।
हर्मेभर्मघणं[1] घणाघनरवत् घण्टाशतैरावृते,
दोलाकल्प विहारिणं रघुपतिं सीतासमेतं भजे ।। 2

साकेते सौधबद्ध ध्वजशतमहिते राजमाग विशाले,
घण्टारवैरुपेते कनककुथयुते गंधनागे वसन्तम् ।
विद्याकल्पोज्ज्वलाङ्गं रथगजतुरगैरावृतं सुप्रसन्नं,
रामं श्वेतातपत्रावृतमुखकमलं चिन्तया[2]म्यं तरङ्गे ।। 3

साकेते मणिकोटिभिः सुखचिते दिव्याम्बरालङ्कृते,
हेमस्तंभ सहस्रकोटि घटिते तारापथात्युन्नते ।
रम्यस्वर्णमये विचित्रभुवने दिव्यन्तरिक्ष मुदा—
रामं स्मेर मुखाम्बुज रघुपतिं सीतासमेतं भजे ।। 4

साकेतेमणितोरणाञ्चितलसद्वीथीशत प्राङ्गणे,
सानन्दं भरतादिभिः सहचरैरत्यन्त मोदापरैः ।
क्रीडन्तं मणिकन्दुकैः करगतैरन्योन्य मङ्योज्ज्वलैः,
पौरस्त्री नयनोत्सवैः प्रतिदिनं पूज्यं भजे राघवः ।। 5

---

1. घनंघना
2. चिन्तयामस्तरङ्गे

साकेते कनकाद्रि श्रृङ्गघटते कल्पद्रुमै र्यावृते,
वैडूर्यादिमणिन्द्रकान्ति घटि[1]ते देवेन्द्र नीलोज्ज्वले ।
कुर्वन्तं मणिनायकं मणिगृहे माणिक्यपीठे भजे,
पुत्रौ मन्मथसुन्दरौ कुशलवौ संसेव्यपादाविमौ ।। 6

साकेते जननीकरार्पित लसत्कस्तूरी[2]का सुन्दरे,
फालेमौक्तिकजालकं शशिनिभं स्वर्णाङ्कितं वर्तुलम् ।
चूडालम्ब मनोज्ञहारकलितं विभ्राणमत्युज्ज्वलं,
रामं कोस[3]लपुत्रिकां वरसुतं सीतासमेतं भजे ।। 7

साकेतेसरयूजलेति विमले प्रोत्फुल्ल पद्माङ्किते,
दिव्यश्री शतकोटि नृत्यरुचिरे स्वर्गापगा सुन्दरे ।
पश्यं तेषु सुरांगना सु शपथं क्रीडन्तमुर्वीसुतां,
वाहुभ्यां[4] विमलोदकेन रुचिरं सीतासमेतं भजे ।। 8

कदासुरतरूस्थले कनकमण्डपे पुष्पके,
वरासनमुपेयुषं वसुदलारविन्दोज्ज्वले ।
करेणहृदय स्पृशा कलितमुद्र चिन्मुद्रिका,
मम स्फुटतु वा[5]सनामनिश बुद्धविरासन् ।। 9

नदीरमणिवन्धनं मतिमतामुदार धनजगत्—
विहितरन्धनं लकला[6]काम निस्पन्दनम् ।
विलिप्तहरिचन्दनं विनुतपात संक्रन्दनं,
भजामि रघुनन्दनं पवननन्दन स्यन्दनम् ।। 10

---

1. कान्तिखचिते
2. कस्तूरिका
3. कोशलपुत्रिका
4. पश्यन्तीषु सुरांगनासु
5, वासनामनिशमूर्ध्व वीरासने
6. सकलकाम

रक्ताम्भोरुह्लोचनं कुवलयश्याम कपोल धनुः,
कोटिन्यस्त कराम्बुजं धृततनुत्राणं जटामण्डितम् ।
जेतारं खरदूषण त्रिशिर सामावद्ध गोधांगुली,
त्राणमार्गणपूर्णतूण युगलं कोदण्डरामं भजे ।। 11

श्रीमत्कल्पद्रुमूले शकलमणिमये म[1]ण्टपे पुष्पकाख्ये,
तन्मध्ये सूर्यविम्बद्युति सरसिरुहे शोभमनायपद्मे ।
पश्यन्निष्ठां जनक तनयां वामभागोपसेव्यं,
सौमित्रि भानुपुत्रं पवनसुतयुतं पातु मां रामचन्द्र ।। 12

विनीलजलदोपमं विमलचन्द्र विम्वाननं,
विनिन्द्रमणिकुण्डलं विकचपुण्डरीकेक्षणम् ।
विभन्न दनुजाधिपं विधृतबाण बाणासनं,
विभीषणवरप्रदं विजय राममीडे निशम् ।। 13

राजद्राजीवनेत्रं रघुकुलतिलकं रञ्जिताशेषलोकं,
वामाङ्कालोकिसीतं त्वरकरधनुषी कुण्डलो दीप्तगण्डम् ।
श्यामं शान्तं प्रसन्नं द[2]रहसितमुखं वज्रसिंहासनस्थं,
रामं राजत्किरीटं रविशत विशदं राजराजेश मीडे ।। 14

भद्र वाख्यानमुद्रां करसरसिरुहे दक्षिणे धारयन्तं,
सव्ये जानुन्युदारं करमपि च मुदा धारयन्तं स्फुरन्तम् ।
पश्यं ते वामभागे करधृत कमलं चित्रभूषाविभूषा,
विशेषां वैदेहीं काञ्चनाढयां स्तनभरणमितां भावयेद्रामचन्द्रम् ।। 15

विवुधविटपि मूले जानकीलक्ष्मणाभ्यां,
सहितमनिलवेगं बाणमादाय चापम् ।
बहुशरपटतूणं रम्य पुष्पोपहारं,
विवुधभरणचित्तं चिन्तयेद्रामचन्द्रम् ।। 16

---

1. मण्डपे
2. वरहसित

जानाति राम तव गतिं हनूमान् जानाति राम तव सख्यगतिं कपीशः ।
जानाति राम तव युद्धगतिं दशास्यो जानाति राम धनदानुज एव सत्यम् ।। 17

हे राम हे रमण हे जगदेकवीर हे नाथ हे रघुपते करुणालवाला ।
हे जानकीरमण हे जगदेकबन्धो मां पाहि दीनमनिशं कृपणं कृतघ्नम् ।।18

अयोध्यानाथ राजेन्द्र सीताकान्त जगत्पते ।
श्रीरामपुण्डरीकाक्ष रामचन्द्र नमोस्तुते ।। 19

दक्षिणे लक्ष्मणो धन्वि वामतो जानकी शुभा ।
पुरतो मारुतिर्यस्य तन्नमामि रघूत्तमम् ।। 20

रामं राक्षसमर्दनं रघुपतिं शक्रारिविध्वंसिनं,
सुग्रीवेप्सित राज्यदं सुरपतेः पुत्रांतकं शार्ङ्गिणम् ।
भक्तानामभयप्रदं भयहरं पापौघविध्वंसिनं,
सीतासेवितपादपद्मयुगलं रामं भजे श्यामलम् ।। 21

भवभयहरमेकं , भानुकोटिप्रकाशं,
करधृतशरचापं कालमेघावभासम् ।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं,
कमलविशदनेत्रं सानुजं राममीडे ।। 22

रामं श्यामपयोधि नीलममलं राजीवनेत्रं सदा-ऽऽ—
हल्याशापनिवारण प्रणयपादाम्भोजमुर्वीश्वरम् ।
विद्युत्कोटिसहस्र दीधिति लसत्कोटीरमुस्तोज्ज्वलं,
ध्यायेत्तारक नाममीश्वरसखं दैत्येयवंशापहम् ।। 23

दशरथसुतमीशं दण्डकारण्यवासं,
शतमखमणिनीलं जानकीप्राणलोलम् ।
सकलभुवनमोहं सन्नुतां – भोद देहं,
बहुलनुत समुद्रं भावये रामभद्रम् ।। 24

सरयूतीरवने लतानिवसने सद्रत्नवेदीतटे,
सु[1]मपर्यङ्क तले विदेहतनया सा[2]धं परिक्रिड[3]ता ।
कस्तूरीघनसार चन्दनमिलद्गन्धोल्लसत्पावनि,
पायात्मूर्तिरनामयी रघुपतेर्भद्रात्मिकानोनिशम् ।। 25

वैदेही प्रियवल्लभं विजयनं वातात्मजाधीश्वरं,
वाणीवारिधि वानरादि विनुतं वंदार मन्दारकम् ।
विश्वामित्र वसि[4]ष्ट वासवशिव वागीश शश्वन्नुतं,
देवेशं विनतात्मजाभिविनुतं वंदे सदा राघवम् ।। 26

विशालनेत्रं तरि[5]पूर्णं गात्रं सीताकलत्रं सुरवैरिजैत्रं ।
जगत्पवित्रं परमात्म तंत्रं श्रीरामचन्द्रं प्रणमामि चित्तें ।। 27

सौमित्रि माणार्णवपूर्ण चन्द्र सीतालसल्लोचन पूर्णचन्द्र ।
सुरारि वक्त्राम्बु पूर्णचन्द्रं संरक्ष मां राघव रामचन्द्र ।। 28

यस्य किञ्चिदपि नो हरिणीयं चर्म किञ्चिदपि नो चरणीयं ।
रामनाम च सदा स्मरणीयं लीलया भवजल तरणीयम् ।। 29

रङ्गमणिमभितो गृहंगणे भृ[6]ङ्गनीलमलकावृताननं ।
मङ्गलप्रदममङ्गलापहं संगृहणे दशरथात्मजं हृदि ।। 30

दनुजतिमिरभानुं तापसैश्चिन्त्यमानं शमितकलुषचारं सेवकेदुष्टदूरं ।
दलितविषमसालं दण्डितारातिजालं प्रणतु शिखिरिशत्रुं भव्य पाथोदगात्रम् ।।31

---

1. सुभपर्यङ्क
2. सार्धं
3. परिक्रीडता
4. वशिष्ठ
5. परिपूर्ण
6. भृङ्ग

हे गोपालक हे दयाशरंनिधे हे शम्भु चापवृते,
हे दैत्यान्तक हे विभीषण दयापा[1]रिण हे भूपते ।
हे विदेह[2]सुतामनोज्ञविहृते हे कोटिमाराकृते,
हे नव्याम्बुजनेत्रपालय परं जानामि न त्वां विना ।। 32

साकेते प्रणवाब्ज रत्नखचिते सिंहासने संस्थितं,
विश्वामित्रवशिष्[3]ट गालवमुखैराशीर्भरं च जटैः ।
पूज्यं पार्श्वंगताब्ज चारुनयनं विद्युच्चलच्चामरं,
वंदे कोमल संस्मिताननमिलारक्षावतीर्णं हरिम् ।। 33

नित्यंनिर्जितपंकसम्भवमहानेत्रश्रियंराघवं,
रामं पर्वणि चन्द्रचारुवदनं दिक्पालकैः सेवितम् ।
कर्पूरागरु चन्दनार्द्र हृदयं मन्दारमालाङ्कितं,
विद्युत्पुञ्जनिभांवरावृत तनुं रामं भजे श्यामलम् ।। 34

श्रीरामं कुशिकात्मजस्य वचनेनाकृष्य बाणासनं,
मारीचं च सुबाहु कंशरयुगेनैवाहवे लीलया ।
कान्तं सुन्दरकाकपक्षरुचिरं सौमित्रिणा संस्तुतः,
पायान्नः कमलेमुखे सकरुणः क[4]लाम्बुदश्यामलम् ।। 35


आनन्दरूपं वरदं प्रसन्नंसिंहासनं सेवित पारिजातं,
नीलोत्पलाङ्गं भुवनैकमित्रं रामं भजे राघव रामचन्द्रम् ।। 36

युद्धे वसन्नवृड्रद्भुत बाणवर्षैः, रामः 'प्रहारसमये रजनीचराणां ।
रक्षानुकूल समयाय विभीषणाय, लङ्काधिपत्यमदिशद्रघुरामचन्द्रः ।। 37

1. दयाकारिण
2. विदेहसुता
3. वशिष्ठ
4. कृष्णाम्बुदश्यामलम्



Rāmacandra attacking a demon
(असुर का वध करते श्रीराम)



वेदान्तनादं स्वकृतैक दासं हृताभिमानं त्रिदशप्रधाने।
गतेन्द्रियानं विगतावसानं श्रीरामचन्द्रं सततं नमामि ॥ 38

श्रीरामचन्द्र धृतिचापश[1]यकं नीलोत्पलाभं नलिनायतेक्षणं।
सौमित्रिणा सेवित पाद पङ्कजं सीतासमेतं शरणं भजे[2]हम् ॥ 39

श्रीरामचन्द्र करुणाकर दीनबन्धो, सीतासमेत भरताग्रजराघवेश।
पापार्त्तिभञ्जन भयातुर दीनव[3]न्दो, पापाम्बुधौपतितमुद्धरमामनाथम् ॥40

इदं शीरी[4]रं शतसन्धि ज[5]र्जु रं पतत्यवश्यं परिणाम दुर्लभं।
किमौषधंपृच्छसिमूढ दुर्मते निरामयं रामकथा[6]मृतं पिव ॥ 41

दशमुखगजसिंहं दैत्यगर्वादरं हं,
कदनं भयंदहस्तं तारक ब्रह्मशस्तम्।
मणि खचितकिरीटं मञ्जुलालाप नादं,
दशरथकुलचन्द्रं रामचन्द्रं भजेहम् ॥ 42

लङ्काविरामं रणरङ्गभीमं राजीवनेत्रं रघुवंशमित्रं।
कारुण्यमूर्ति क[7]रुणापरिपूर्ति श्रीरामचद्रं शरणं प्रपद्ये ॥ 43

श्रीरामचन्द्रमनिशं हृदिस्थितं श्रीराममिन्दुवदनं प्रविभासं।
भावयामि निगमांतनिवासं भारतीपपि[8]शु तं भववन्द्यम् ॥ 44

---

1. धृतचापशायकं
2. भजेऽहम्
3. दीनबन्धो
4. शरीरं
5. जर्जरं
6. रामकथाऽमृतं
7. करुणाप्रपूर्ति
8. भारतीपतिस्तुतं

कौमारे रामचद्रः कमलमृदुपदा शोभयन् भूमिभागं,
मातुश्चानन्दकारी मरकतनिकराकारमिन्दीवराक्षः ।
उत्सङ्गे सन्निविष्टः पितुरमरवरैस्तूयमानोपकारी,
नानालङ्कार भूषस्फुरतु मम सदा मामया राम ईशः ।। 45

सन्नद्धः कवची खड्गी चापबाणधरोयुवा ।
गच्छत् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ।। 46

सुग्रीवमित्रं स्र[1]मंपवित्रं सीताकलत्रं नवहेमसूत्रं ।
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं शिरसा नमामि ।। 47

श्रीराघवेति रमणेति रघूद्वहेति रामेति रावणहरेतिरमा[2]धवेति ।
साकेतनाथ सुमुखेति च सुव्रतेति वाणी सदा वंदतु राम हरे हरेति ।।48

जयतु जयतु रामो जानकीवल्लभो[3]यं,
जयतु जयतु रामश्चन्द्र चूडार्चितांध्रिः ।
जयतु जयतु वाणीनाथ नाथः परात्मा,
जयतु जयतु रामो नाथनाथः कृपालुः ।। 49

वरंनजा[4]चे रघुनाथ युष्मत्पादाब्ज भक्ति सततं ममास्तु ।
इदंप्रियंनाथ वरं प्रयच्छ पुनः पुनस्त्वामिदमेव याचे ।। 50

अम्बोधिरोषनयनैररुणायमानै, र्नाथस्य मृष्टवा नयने रघूणां ।
मरुद्गणैस्तक्षणभानु शङ्के मन्दाकिनी मङ्गलसूत्र भङ्गः ।। 51

1. परमंपवित्रं
2. र्माधवेति
3. वल्लभोऽयं
4. वरं च माचे

अम्भोधिस्मयबंधनेन जगदानंदेन भूपुत्रिका,
स्वांतांभो भवबांधवेन नतरक्षायत चित्ते समे।
कर्णालम्बितकुण्डलेनदी विषंत्राणाद्रय .मेनाश्रितः,
श्रेयः कल्पलतेन मे मतिरयं रामेण संवर्धताम् ।। 52

रामादौजन सं कुमारगमनंयज्ञ प्रतिपालनं,
शापादुद्धरणं धनुर्विदलनं सीतांगनोद्वाहनम् ।
लङ्काया दहनं समुद्रतरणं सौमित्रि संमोहनं,
रक्षः संहरणं स्वराज्यभवनं चैतद्धि रामायणम् ।। 53

जन्मादौक्रतुरक्षणं मुनिपतेस्थाणोर्धनुर्भञ्जनं,
वैदेही ग्रहणं पितुश्चवचनाद् घोराटवी गाहनम् ।
कोदण्ड ग्रहणं खरादिमथनं मायामृगाच्छेदनं,
वद्धाधि क्रमणं दशास्यनिधनं चैतद्धि रामायणम् ।। 54

पूर्वं राम तपोवनानुगमनं हत्वामृगं काञ्चनं,
वैदेहीहरणं जटायु मरणं सुग्रीव सम्भाषणं ।
बाली निग्रहणं समुद्रतरणं लङ्कापुरीदाहनं,
पश्चाद्रावण कुम्भकर्णवधनं चैतद्धि रामायणम् ।। 55

शान्तं शारदं चन्द्रकोटि सदृशं चन्द्राभिरामाननं;
चन्द्राकाग्नि विकासकुण्डलधरं चन्द्रावतंसस्तुतम् ।
वीणापुस्तक साक्षसूत्रविलद्व्याख्यानमुद्राकरं,
दैवेशं भरतादिभिः परिवृतं रामं भजे श्यामलम् ।। 56

कृष्णं भीमधनुकठोरनिनदं ब्रह्मादिसविस्मयं,
भास्वद्वाजिगतेरमार्गमनिशं शंभोः शिरः कम्पयन् ।
दिग्दन्तिः खलनं कुलाद्रिचलनं सप्तार्णवोन्मीलनं,
वैदेहीमदनं मदान्धदमनं त्रैलोक्य सम्मोहनम् ।। 57

कञ्जातपत्रायत लोचनाय कर्णावतंसोज्ज्वलकुण्डलाय ।
कारुण्यपात्राय सुवंशजाय नमोस्तु रामाय सलक्ष्मणाय ॥ 58

विद्युन्निभाम्भोदसुविग्रहाय विद्याधरैः संस्तुतसद्गुणाय ।
वीरावताराय विरोधिहर्त्रे नमोस्तुरामाय सलक्ष्मणाय ॥ 59

संसक्तदिव्यायुध कार्मुकाय समुद्रगर्वापहरायुधाय ।
सुग्रीवमित्राय सुरारिहंत्रे नमोस्तुरामाय सलक्ष्मणाय ॥ 60

पीताम्बरालङ्कृतमध्यकाय पिता महेन्द्रामरवंदिताय ।
पित्रेस्व भक्तस्य जनस्यमात्रे नमोस्तु रामाय सलक्ष्मणाय ॥ 61

नमो नमस्ते[1]खिलपूजिताय नमो नमस्तेन्दु निभासनाय ।
नमो नमस्ते रघुवंशजाय नमोस्तुरामाय सलक्ष्मणाय ॥ 62

इमानि पञ्चरत्नानि त्रिसन्ध्यं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ 63

श्रीरामः कल्पवृक्षो मे विरामः सकला पदः ।
अभिरामस्त्रिलोकानां रामः क्षेम करोतु नः ॥ 64

हृदय सदतचित्तं चित्तनाथं गुणानां,
उदधि मुदित निम्नं निम्नगालङ्कृताघ्रिम् ।
जनकपति त[2]नुजा स्वांत कान्तो रबलस्य,
स्फुरणकरणचन्द्रं रामचन्द्रं भ[3]जेहम् ॥ 65

वदतु वदतु वाणी रामरामेति नित्यं, जपतुजपतु नित्यं रामपादारविन्दम् ।
वदतुवदतु देहं चिन्तयेद्रामचन्द्रं, नभवतुमम पापं जन्मजन्मान्तरेषु ॥ 66

1. नमस्तेऽखिल
2. तनूजा
3. भजेऽहम्

चापबाणधरः सीताकामदः कान्तिमान्नरः ।
सीतालक्ष्मण संयुक्तः पातु मां राघवेश्वरः ।। 67

प्रातस्मरामि रघुनाथ मुखारविन्दं,
मन्दस्मितं मधुरभाषि विशालफालम् ।
कर्णावलम्बि चलकुण्डल गण्डभागं,
कर्णान्ति दीर्घनयनं नयनाभिरामम् ।। 68

प्रातर्भजामि रघुनाथपदारविन्दं,
रक्षो ग[1]ड़ाय भयदं वरदं निजेभ्यः ।
यद्राजसंसदि विभीद्य महेशचापं,
सीताकरग्रहण मङ्गलभाव सद्यः ।।69

प्रातर्नमामि रघुनाथपदारविन्दं पद्माङ्कुशादिशुभरेखशुभावहाम ।
योगीन्द्रमानस मधुव्रतसेव्यमानं शापासहं सपदि गौतमधर्मपत्न्या ।। 70

प्रातर्वदामि वचसा रघुनाथनाम वागदोषहारिसकलं कलुषन्निहत्य ।
यत्पार्वसवती[2] नासह भोक्तु कामा प्रीत्यासहस्र हरिनामसमं जजाप ।।71

प्रातश्री यें श्रुतिनुतां रघुनाथमूर्तिं नीलाम्बुदोत्पल सितेतर रत्ननीलां ।
आमुक्तमौक्तिक विशेष विभूषणाढ्यां ध्येयां समस्त मुनिभिः निजभृत्यमुख्यैः ।।72

य श्लोक पञ्चकमिदं नियतः पठेतनित्यं प्रभात समये पुरुषः प्रबुद्धः ।
श्रीरामकिङ्करजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकमनन्य लभ्यम् ।। 73

किं मंत्रै र्बहुभिश्च दुष्करफलै रायासदैस्तद्विदां,
किं चि[3]ल्लोक विधानमात्रविफलैः संसारदुःखावहैः ।
एकः सन्नपि सर्वमंत्रफलदो दोषोज्झितः सर्वदा,
श्रीरामः शरणं मे मति परमो मंत्रो[4]यमष्टाक्षरः ।।74

1. गणाय
2. यत्पार्वती स्वपतिना सह
3. किञ्चिल्लोक
4. मंत्रोऽयमष्टाक्षरः

रामभद्राश्रयः साक्षाद्रामचन्द्रो न संशयः।
तत्र कोदण्ड तूणीरावत्र दण्डकमण्डलुः ॥ 75

रघुनाथपदारविन्दयोस्ते भ्रमरीभूतमदांधकार सूर्य।
अपराधसतालयं कलौ मामवगृह्णातिहि मङ्गलैः कटाक्षैः ॥ 76

राम नाम तव नामजपन्तः पामरा [1]अपि तरंति भवाब्धिम्।
अङ्गसङ्गि भवदङ्गुलमुद्रः किं विचित्रमतरत्कपिरब्धिम् ॥ 77

श्रीरामनामामृत मंत्रवि[2]ज सञ्जीवनं चेन्म[3]सप्रतिष्टं।
हालाहलं वां प्रलयानलं वा मृतोर्मुखं वा वितथी करोति ॥ 78

हा कृष्णाच्युत हाकृपालय हरे हापाण्डवानां सखे क्वासि,
क्वासि सुयोधनावपगतां हारक्षमा द्रौपदीम्।
इत्युक्तौ क्षयवस्त्ररक्षणत्तनु र्योरक्षदाशु क्षणे,
अ[5]र्त्तत्राणपरायणस्य भगवान्नारायण मे गतिः ॥ 79

इन्दीवर दलश्याममिन्दुकोटि निभाननं,
कन्दर्पकोटि लावण्यं वंदेऽहं रघुनन्दनम् ॥ 80

किं योगशास्त्रै किमशेषविद्यया किं योगगङ्गादि विशेषतीर्थैः।
किं ब्रह्मचर्याश्रम शंस[4]चरेण भक्तिर्नचेत्ते रघुवंश कीर्त्या ॥ 81

हे राम भद्राश्र[5]म हे कृपालो हे भक्त लोकैक शरण्यमूर्त्ते।
पुनीहि मां त्वच्चरणारविन्दं जगत्पवित्रं शरणं ममास्तु ॥ 82

1. पामराऽपि
2. मंत्रबीजं
3. मनसि
4. संचरेण
5. भद्राश्रय

हे राम भद्राश्रय योगिचन्द्र प्रसन्नमूर्तौ परिदृश्यमाने।
तापत्रयं नाशमुपैति पुंसां ममांधकारं विनिहन्तुसद्यः ॥ 83

नीलाभ्रभृं[1]दनिखिलेश जगन्निवास,
राजीवनेत्र रमणीय गुणाभिराम।
श्रीराम दैत्यकुल मर्दन रामचन्द्र,
त्वत्पादपद्मनि[2]शङ्क कलयामि चित्ते ॥ 84

कुवलय दलनीलः पीतवासीस्मितास्य,
विविधरुचिरभूषां भूषितोदिव्यमूर्तिः।
दशरथकुलनाथो प्राणनाथो जान[3]की,
निवसतु मम चित्ते सर्वदा रामचन्द्रः ॥ 85

सजल जलद नीलं सन्मुनिस्तुत्य लोलं,
सुगमनिगममूलं यातुधानांत कालम्।
दशरथनृपबालं सत्कृपापूर्ण लोलं,
भजतु भुवन खेलं भक्त संस्तुत्यशीलम् ॥ 86

दशरथ वरपुत्रं जानकीसत्कलत्रं,
दशमुखहरदक्षं पद्म पत्रायताक्षम्।
करधृतशरचापं चारुमुक्ताकलापं,
रघुकुलनृपवर्ण्यं राममीडे शरण्यम् ॥ 87

रामं वीरासनस्थं विमलरविनिभं भासमानस्वरूपम्,
श्यामसीतासमेतं स्मितं रुचिरमुखं कुण्डलोद्दीप्तगण्डम्।
श्रीवत्सं श्रीनिवासं सुरविटपितटन्यस्त सिंहासनस्थं,
दिव्याकल्पोज्ज्वलाङ्गं दिविजपतिनुतं ध्यानयज्ञे नयक्षे ॥ 88

श्रीरामभद्राश्रय सद्गुरूणां पादारविन्दं भजतां नराणां।
आरोग्यमैश्वर्यमनन्तकीर्तिं अन्ते च विष्णोः परमस्ति सत्यम् ॥ 89

---

1. वृंद
2. निश्शङ्क
3. जानकी प्राणनाथो

रणहतदनुजेन्द्रो राजराजात्मचन्द्रो,
समदरिपुमृगेन्द्रो सन्ममोम्भोधि चन्द्रः ।
ललितघन नरेन्द्रो लक्ष्मणानन्दसान्द्रो,
महित सुजनचन्द्रो मैंथी[1]लीप्राणचन्द्रः ।। 90

नमः कोदण्डहस्ताय संदीपितशराय च ।
दण्डिताखिलदैत्याय रामायपन्निवारणे ।। 91

नजानन्जानकी जाने रामे तत्वमपिप्रभौ ।
धिः कुर्याद्यमद्भूतान् स यो नरस्तत्वमिहते ।। 92

रामो मे हृदि सन्निधिं रमयतां रामं भजे दुष्कृते,
रामेणापहृत्तं नमो भगवते रामाय रामाच्छुभम् ।
लक्ष्ये श्रीरघुनन्दस्य सुकृते दोसो[2]स्म्यहं सर्वदा,
नित्यं को[3]सलकन्यकाप्रियसुते रामे मनोवर्तताम् ।। 93

कोदण्डनिर्मुक्त शराग्रखण्डनं, प्रचण्ड विश्वद्भ्रुजदण्डमण्डनं ।
प्रचण्ड चण्डांशुसमानभण्डनं भजामि रामं रणरङ्गमण्डनम् ।। 94

सिंहासनवस्थं मुनिसिद्धसेव्यं रक्तोत्यलालं कृतपादपद्मं ।
सीता समेतं शशिसूर्यनेत्रं रामं भजे राघव रामचन्द्रम् ।। 95

दयारूपे भूपे रघुकुलकलापे सुहृदये,
भुजास्तं भेदं भेतरविजयगुंभे विहरताम्
महावीरेधीरे दशरथकुमारेपरिसरद्,
गुणारामे रामे दशमुखविरामे मम मनः ।। 96

---

1. मैथिली
2. दासोस्म्यहं
3. कोशलकन्यका

गतेष्वनेकेषु भवेषु पापव्रतेष्वमूर्तेषु न योगतीर्थैः ।
विव्रस्तसर्वेषु नृणांकुलेशे संजायते भक्तिरसंतमीडे ।। 97

श्रीराम[1]मद्राश्रितयोगिवर्यं पादाब्जयुग्मं सततं भ[2]जेहं ।
यच्चक्षुषीधामजनप्रवेशं तच्चक्षुषीपस[3]यतियस्य चेतः ।। 98

नग्रस्तस्तमसान चाहिमलिनो दर्शेननोर्कशितो,
नैवास्तं गतवान् चाङ्कितततनुर्नोपाक्षिकश्रीरपि ।
लोकालोक नगेन्द्रलंघनविधौ नौपङ्गुभावंगतो,
निर्दोषोगुणसागरद्रघुपतेस्तेजो यशश्चन्द्रमाः ।। 99

नागानामयुतं तुरङ्गनियुतं सार्धं रथांनांशतं,
पादाताः शतकोटियुद्ध दलितानृत्तान्कबन्धो रणें ।
एवं कोटिसहस्रनर्तनविधौ चञ्चच्चलद्घण्टिका,
यामार्ध परमात्मनो रघुपतेः कोदण्डघण्टारवः ।। 100

भजे[4]हं सदा राममिन्दीवराभं भवारण्यदावानलाभाभिधेयं ।
भवानीहृदाभावितानंदरूपं भवाभावहेतुं भवानी प्रसन्नम् ।। 101

सुरानीक दुःखौघनाशैक हेतुं नराकारदेहं निराकारमीड्यं ।
परेशंपरानंद रूपं वरेण्यं हरिराममीशं भजे भारनाशम् ।। 102

प्रपन्नाखिलानंद दोहप्रपन्नं प्रपन्नार्ति, निःशेषनाशाभिदानं ।
तपोयोग योगीशभावाभिभाव्यं कपीशादिमित्रं भजे रामचन्द्रम् ।। 103

स्फुरद्रत्न केयूर हाराभिरामं धराभारभूता सुरानीकदावं ।
शरश्चन्द्रवक्त्रंलसत्पद्मनेत्रं दुरासाध्यपारं भजे रामचन्द्रम् ।। 104

---

1. श्रीरामभद्राश्रित
2. भजेऽहं
3. पश्यति
4. भजेऽहं

सुराधीश नीलाभनीलाङ्गकान्तिं विराधादि रक्षो गणानीकनाशं ।
किरीटादि शोभं पुरारातिलाभं भजेरामचन्द्रं रघूनामथीन्द्रम् ।। 105

लसच्चन्द्रकोटी प्रकाशादि पीठे,
समासीनमङ्के सह[1]जाय सीतां ।
स्फुरद्हेमवर्णा लसत्कञ्ज पुञ्जं,
भजे रामचन्द्रं निवृत्यादितत्वम् ।। 106

सदाभोगभाजां सुदूरे व्यभात्यं मुदा योगभाजामुदरे बेभान्तं ।
चिदानन्दकन्दं सदा राघवेशं विदेहात्मजानंद कन्दं प्रपद्ये ।। 107

महायोगमाया विशेषानुयुक्तो विभासीशलीला नराकारवृत्तिः ।
त्वदानंद लोला कथापूर्णकन्दानदानंदरूपाभवंतीह लोके ।। 108

यस्य प्राणनिवारणावनकृते स्यातांनिदानौविभौ—
रैन्द्र ध्वांक्षपते कृपाजलनिधौ कोपप्रसादौ मुदे ।
भूयाद्वासवनीलसन्निभतनुर्वामाङ्क सेव्यद्भभः,
सोयं दुष्ट निशाटपाटनपटुः श्रीराघवो नः सदा ।। 109

दुष्टो वाकलुषात्मको[1]पिपिशुनो दुर्मार्गसञ्चारि वा,
मातृघ्नो पि पितृघ्नवर्तनरतो सन्मौनि निन्दापरः ।
योयंस्मृत्यमृतंहितं मधुरसं वक्ता च श्रोतालिखेत्यः,
प्राप्नोति निरन्तरैहिक सुखं निर्वाण सौख्यं ततः ।। 110

इति श्रीरामकर्णामृतः चतुर्थः प्रकरणः
श्री श्रीसीताराम चन्द्रार्पणमस्तु ।
श्री श्रीरामदूतार्पणमस्तु ।

1. सहस्थाय

काव्यागतानांपद्यानामाकाराद्यनुक्रमणी

ALPHABETICAL LIST OF VERSES

2

स Sa

———

पूर्वं राम तपोवनानुगमनं हत्वा मृगं काञ्चनम्,
वैदेहीहरणं जटायुमरणं सुग्रीव सम्भाषणम् ।
बाली निग्रहणं समुद्रतरणं लङ्कापुरीदाहनम्,
पश्चाद्रावण कुम्भकर्णवधनं चैतद्धिरामायणम् ॥

—रामकर्णामृतम्—(प्रकरण चतुर्थ)।५५

⊙

Purvam Rama tapovananugamanam hatva mrgam kancanam
vaidehiharanam Jatayumaranam Sugriva sambhȧsanam
Bali nigrahanam samudrataranam Lankapuridahanam
Pascadravana kumbha karnavadhanam caitaddhi Ramayanam.

—*Ramakarnamrtam*—[*Prakarana IV*]/55